

their hands nothing that is trivial and trashy but something that is typical and first rate. They should be familiar with the masterpieces and their authors whose names are by-words in our social life. This ancient language of ours is a veritable mine of rich reading matter and all that one has to do is to select what will make a special appeal to our youths. We have been guided by these paramount considerations. We have endeavoured to make the collection sufficiently representative, having included excerpts from the Taittirīya Sanhitā of the Black Yajurveda, Vālmiki's Rāmāyana, Vyāsa's Mahābhārata, Shudraka's Mrichchkatika, Kālidāsa's Kumārsambhava and Shākuntala, Shankarānanda's Prashnottararatnamālā, Bāna's Kādambari and Harshacharita, Bhavabhuti's Uttararāmacharita and Jagannātha Pandit's Bhāminivilāsa. Besides these there are extracts from such popular works as Hitopadesha, Purushaparīkshā and Bhojaprabandha.

If our young readers enjoy these selections our efforts would be amply rewarded.

JODHPUR,
December, 1932.

AUTHORS.

विषय-सूची



संस्कृतसाहित्यरत्नावलिः ।

१–मंगलाचरणम् ।

रजोजुषे जन्मनि सत्त्ववृत्तये
स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ॥ १ ॥

नमस्त्रिमूर्तये तुभ्यं प्राक् सृष्टेः केवलात्मने।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ २ ॥

त्वमादिदेवः पुरुषः पुराण—
स्त्वमस्य विश्वस्य परं निधानम्।
वेत्ताऽसि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥ ३ ॥

वायुर्यमोऽग्निर्वरुणः शशांकः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥ ४ ॥

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं संनिधिं संनिधिं क्रियात् ॥५॥
या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माऽच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥६॥

नानारूपीनाम् ।

२—मित्रलाभः ।

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः ।
साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥१॥

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः सन् कृतान्तमिव द्वितीयमटन्तं पाशहस्तं व्याधमपश्यत् । तमवलोक्याचिन्तयत् । अद्य प्रातरेवानिष्टदर्शनं जातम् । न जाने किमनभिमतं दर्शयिष्यति । इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः ।

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम् । स च प्रच्छन्नो भूत्वा स्थितः । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डुलकणानवलोकयामास । ततस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह कपोतराजः । कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः ।

विपदि धैर्यमथाऽभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥७॥

इदानीमप्येवं क्रियताम् । सर्वैरेकचित्तीभूय जालमादायो-
ड्डीयताम् । यतः

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥७॥

इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः । अन-
न्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चादधावत् ।
ततस्तेषु चक्षुर्विषयमतिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः ।
अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः । स्वामिन् । किमि-
दानीं कर्तुमुचितम् । चित्रग्रीव उवाच ।

माता मित्रं पिता चेति स्वभावात् त्रितयं हितम् ।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः ॥८॥

अस्माकं मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे
चित्रवने निवसति । सोऽस्माकं पाशांश्छेत्स्यति ।
इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः ।

हिरण्यकश्च सर्वदापायशङ्कया शतद्वारं विवरं कृत्वा निव-
सति । कपोतावपातभयचकितः स तूष्णीं स्थितः । चित्रग्रीव
उवाच । सखे हिरण्यक किमस्मान् न सम्भाषसे । हिरण्यकस्तु
तद्वचनं प्रत्यभिज्ञाय ससम्भ्रमं बहिर्निःसृत्याब्रवीत् । आः
पुण्यवानस्मि । प्रियसुहृन्मे चित्रग्रीवः समायातः । [illegible]

तानवलोक्य सविस्मयः क्षणं स्थित्वा प्रोवाच। सखे किमेतत्। चित्रग्रीव आह। सखेऽस्माकं प्राक्तनजन्मकर्मणः फलमेतत्।

रोगशोकपरीतापबन्धनव्यसनानि च।
आत्मापराधवृक्षस्य फलान्येतानि देहिनाम्॥१०॥

एतदाकर्ण्य हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति। तदा चित्रग्रीवो ब्रूते। मित्र मा मैवम्। प्रथममेतेषामस्मदाश्रितानां पाशांस्तावच्छिन्धि। हिरण्यकोऽप्याह। अहमल्पशक्तिर्दन्ताश्च मे कोमलाः। तदेतेषां पाशांश्छेत्तुं कथमहं समर्थो भवामि। तद्यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशं छिनद्मि। तदनन्तरं यावच्छक्यमन्येषामपि बन्धनं छेत्स्यामि। चित्रग्रीवोऽप्युवाच। अस्त्वेवम्। तथापि यथाशक्ति बन्धनमेषां खण्डय। हिरण्यकेनोक्तम्। आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां सम्मतम्। यतः

आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥११॥

चित्रग्रीवोऽब्रवीत्। नीतिस्तावदीदृश्येव। किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः। तेनेदं ब्रवीमि। यतः

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति॥१२॥

अन्यच्च पश्य।

यदि नित्यमनित्येन निर्मलं मलवाहिना।
यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम्॥१३॥

यतः

शरीरस्य गुणानां च दूरमत्यन्तमन्तरम्।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः॥१४॥

[illegible] विनश्वरः [illegible] गुणास्तु [illegible]

[illegible] ॥१५॥

[illegible]

[illegible]

[illegible] ॥१६॥

काकः पुनराह ।

भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघः ॥१७॥

हिरण्यकोऽब्रवीत् । चपलस्त्वं चपलेन सह स्नेहः सर्वथा न कार्यः । किंचान्यत् । शत्रुपक्षो भवानस्माकम् । उक्तं चैतत् ।

शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥१८॥

लघुपतनको ब्रूते । श्रुतं मया सर्वम् । तथापि ममैतावानेव सङ्कल्पो यत्त्वया सह सौहृद्यमवश्यमेव मया करणीयम् । नो चेदनाहारेण मया तव द्वारि निजशरीरं त्याज्यम् । तथा हि

मृद्घटवत् सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्यश्चाशु सन्धेयः ॥१९॥

पतङ्गाश्रया लतां सङ्गतिरिष्यते । अन्यच्च

शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥२०॥

एतैर्गुणैरुपेतो भवदन्यो मया कः सुहृत् प्राप्तव्यः । इत्यादि तद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह । आप्यायितोऽहं भवतामनेन वचनामृतेन । तथाचोक्तम्

घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली
न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।
प्रीत्या सज्जनभाषितं प्रभवति प्रायो यथा चेतसः
सद्युक्त्या च परिष्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम् ॥२१

उक्तञ्च

रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम्॥२२॥

अनेन वचनक्रमेण न दैन्यदूषणमपि त्वयि न लक्ष्यते। तद्भवतु भवतोऽभिमतमेव। इत्युक्त्वा हिरण्यको मैत्रं विधाय भोजनविशेषैर्वायसं संतोष्य विवरं प्रविष्टः। वायसोऽपि स्वस्थानं गतः। ततः प्रभृति तयोरन्योन्याहारप्रदानेन कुशलप्रश्नैर्विश्रम्भालापैश्च कियान् कालोऽतिवर्तते।

एकदा वायसो हिरण्यकमाह। सखे वायसस्य कष्टतरलभ्याहारमिदं स्थानम्। तदेतत्परित्यज्य स्थानान्तरं गन्तुमिच्छामि। हिरण्यको [illegible]।

स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः।
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत्॥२३॥

मित्र कापुरुषस्य वचनम्। यतः

को धीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतो
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्।
यद्दंष्ट्रानखलाङ्गूलप्रहारैः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः॥२४॥

[illegible] मया [illegible]। [illegible]
[illegible]। [illegible]।

[illegible]

हिरण्यकोऽभणत् । तत् किमत्रावस्थाय मया कर्तव्यम् । यत्र न तृप्तिर्न च बान्धवास्तं देशं परिवर्जयेत् । अतो मामपि तत्र नय । वायसोऽवदत् । एवमस्तु ।

अथ वायसस्तेन मित्रेण सह विचित्रकथालापसुखेन तस्य सरसः समीपं जगाम । ततो मन्थरो दूरादेव लघुपतनकमवलोक्योत्थाय यथोचितमातिथ्यं विधाय मूषिकस्याप्यातिथ्यसत्कारं चकार । यतः

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः ॥२५॥

वायसो जगाद । सखे मन्थर सविशेषपूजामस्मै विधेहि । यतोऽयं पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यको नाम मूषिकराजः । एतद् गुणस्तुतिं जिह्वासहस्रद्वयेन सर्पेश्वरोऽपि कर्तुं समर्थः स्यान्नवा । इत्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान् । ततो मन्थरः सादरं हिरण्यकं सम्पूज्याह । भद्र आत्मनो निर्जनवनागमनकारणमाख्यातुमर्हसि । हिरण्यकोऽवदत् । कथयामि श्रूयताम् ।

अस्ति चम्पकाभिधायां पुरि परिव्राजकावसथः । तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति । स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति । अहं च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि । अनन्तरं तस्य प्रियसुहृद् वीणाकर्णो नाम परिव्राजकः समायातः । तेन सह नानाकथाप्रसंगावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत् । तद् दृष्ट्वा वीणाकर्ण उवाच । सखे किमिति मम कथाविरक्तोऽन्यासक्तो भवान् । चूडाकर्ण आह । भद्र नाहं विरक्तः । किन्तु पश्यायं मूषिको ममापकारी सदा पात्रस्थं

अन्यच्च

रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम्॥२२॥

अनेन वचनक्रमेण तदेकदूषणमपि त्वयि न लक्ष्यते। तद्भ-वतु भवतोऽभिमतमेव। इत्युक्त्वा हिरण्यको मैत्र्यं विधाय भोजनविशेषैर्वायसं सन्तोष्य विवरं प्रविष्टः। वायसोऽपि स्वस्थानं गतः। ततः प्रभृति तयोरन्योन्याहारप्रदानेन कुशल-प्रश्नैर्विश्रम्भालापैश्च कियान् कालोऽतिवर्तते।

एकदा वायसो हिरण्यकमाह। सखे वायसस्य कष्टलभ्या-हारमिदं स्थानम्। तदेतत्परित्यज्य स्थानान्तरं गन्तुमिच्छामि। हिरण्यकोऽवादीत्।

स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः।
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत्॥२३॥

मित्र कापुरुषवचनमेतत्। पश्य

को वीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतो
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्।
यद्दंष्ट्रानखलांगुलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः॥२४॥

अस्ति मया सुनिरूपितं स्थानम्। तत्राहं युष्मान् नयामि। हिरण्यकोऽवदत्। किं तत्।

वायसोऽकथयत्। अस्ति दण्डकारण्ये कर्पूरगौराख्यं सरः। तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कूर्मः सहज-धार्मिकः प्रतिवसति। स च मत्स्यादानविशेषैर्मां संवर्धयिष्यति।

भिक्षान्नं भक्षयति। वीणाकर्णो नागदन्तकमवलोक्याह। कथमयं मूषिकः स्वल्पबलः सन्नेतावद्दूरमुत्पतति। तदत्र केनापि कारणेन भवितव्यम्। धनबाहुल्यमेव तदत्र कारणं प्रतिभाति। यतः

धनवान् बलवाँल्लोके सर्वः सर्वत्र सर्वदा।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥२६॥

ततः खनित्रमादाय तेन विवरं खनित्वा मम चिरकालोपार्जितं धनं गृहीतम्। ततो निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दं मन्दमुपसर्पंश्चूडाकर्णेनावलोकितोऽहम्। ततस्तेनोक्तम्। पश्येमं सजातिसमतां गतं पापमाखुम्।

दारिद्र्यान्मरणाद्वापि दारिद्र्यमवरं स्मृतम्।
अल्पक्लेशेन मरणं दारिद्र्यमतिदुःसहम् ॥२७॥

एतदाकर्ण्य मयाऽऽलोचितम्। ममात्रावस्थानमयुक्तमिदानीम्। यच्चान्यस्मा एतद्वृत्तान्तकथनं तदप्यनुचितम्। यतः

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।
वञ्चनं चापमानं च मतिमान्न प्रकाशयेत् ॥२८॥

तथा चोक्तम्।

अत्यन्तविमुखे दैवे व्यर्थयत्ने च पौरुषे।
मनस्विनो दरिद्रस्य वनादन्यत् कुतः सुखम् ॥२९॥

यच्चात्रैव याचनया जीवनं तदतीव गर्हितम्। यतः

वरं विभवहीनेन प्राणैः सन्तर्पितोऽनलः।
नोपचारपरिभ्रष्टः कृपणः प्रार्थितो जनः ॥३०॥

संसारविषवृक्षस्य द्वे एव मधुरे फले।
काव्यामृतरसास्वादः सङ्गमः सज्जनैः सह ॥३५॥

मन्थर उवाच।

अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनं
मानुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवनम्।
धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं
पश्चात्तापहतो जरापरिगतः शोकाग्निना दह्यते ॥३६॥

युष्माभिः किलातिसञ्चयः कृतः। तस्यायं दोषः। शृणु।

उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥३७॥

अन्यच्च।

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति ॥३८॥

तदिदानीं यातु किमतिक्रान्तोपवर्णनेन। यतः

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम्।
आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥३९॥

तत्सखे सर्वदा त्वया सोत्साहेन भवितव्यम्। दशा-
विशेषेण च शान्तिः करणीया।

सुखमापतितं सेव्यं दुःखमापतितं तथा।
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ॥४०॥

विशेषतश्च

विनाप्यर्थैर्धीरः स्पृशति बहुमानोन्नतिपदं
समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः ।
स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां
द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ॥४१॥

तस्मात् सखे विश्रब्धमालापैर्नैव सहात्र कालो नीयताम् । इति निशम्य लघुपतनको ब्रूते । धन्योऽसि मन्थर सर्वदाऽऽश्रयणीयोऽसि ।

एवं ते स्वेच्छाहारविहारं कुर्वाणाः सन्तुष्टाः सुखं निवसन्ति स्म । अथ कदाचिच्चित्राङ्गनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः । ततः पश्चादायान्तं भयहेतुं संभाव्य मन्थरो जलं प्रविष्टो मूषिकश्च विवरं गत उड्डीयमानो वायसो वृक्षाग्रमारूढः । ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न कोऽप्यवलोकितः । पश्चादागत्य पुनः सर्वे मिलित्वोपविष्टाः । मन्थरेणोक्तम् । भद्र मृग कुशलं ते स्वेच्छयोदकाद्याहारोऽनुभूयताम् । अत्रावस्थानेन वनमिदं सनाथीक्रियताम् । चित्राङ्गो वदति । लुब्धकत्रासितोऽहं भवतां शरणमागतः । भवद्भिश्च सह मित्रत्वमिच्छामि ।

हिरण्यकोऽभाषत । मित्रत्वं तावदस्माभिः साकं यत्नेन विनैव निष्पन्नम् । तदत्र स्वगृहनिर्विशेषेण स्थीयताम् । तच्छ्रुत्वा मृगः सानन्दः कृतस्वेच्छाहारः पानीयं पीत्वा जलासन्नतरुच्छायायामुपविष्टः ।

अथ मन्थरो ब्रवीति । कुरङ्ग केन त्रासितोऽसि । अप्यस्मिन्निर्जनेऽरण्ये कदाचिद् व्याधाः संचरन्ति । मृग उवाच । अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नृपतिः । स च दिग्विजय-

इहैव दृष्टानि मयैव तानि
जन्मान्तराणीव दशान्तराणि ॥४४॥

अपदेत्यमेवैतत् ।

कायः संनिहितापायः सम्पदः पदमापदाम् ।
समागमाः सापगमाः सर्वमुत्पादि भंगुरम् ॥४५॥

अहो नु भोः ।

मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ४६

इति बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह । यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम् । तावूचतुः । त्वरं यथाकार्यमुपदिश । हिरण्यक आह । चित्राङ्गो जलाभ्यर्णमित्वा मृतमिवात्मानं निश्चेष्टं दर्शयतु । काकश्च तस्योपरि स्थितया चञ्च्वा किमपि लिखतु । नूनमनेन लुब्धकेन मृगमांसार्थिना तत्र कच्छपं विहाय तूर्णं गन्तव्यम् । ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि । ततश्चित्राङ्ग-लघुपतनकाभ्यां शीघ्रं तत्र गत्वा तथाऽनुष्ठिते सति स व्याधः परिश्रान्तः पानीयं पीत्वा तरोरधस्तान्निषण्णः संस्तथाविधं मृगमवलोक्य कच्छपं जलसमीपे निधाय कर्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः । अत्रान्तरे हिरण्यकेनागत्य छिन्न-बन्धनः स कूर्मो द्राग्जलाशयं प्रविष्टः । स च मृग आसन्नं तं व्याधं विलोक्योत्थाय द्रुतं पलायितः । प्रत्यावृत्य लुब्धको

क्रमेणागत्य चन्द्रभागानदीतीरे समावासितकटको वर्तते। प्रातश्च तेनाऽऽगन्तव्यं कर्पूरसरःसमीपे श्राव्यम्। इति मृगयूणां मुखात् किंवदन्ती श्रूयते। तदत्रापि प्रातरवस्थानं भयहेतुकमित्यालोच्य यथा कार्यं तथाऽऽरभ्यताम्। तदाकर्ण्य कमठः सभयमाह स्म। मित्र जलाशयान्तरं व्रजामि। काकमृगावप्युक्तवन्तौ। एवमस्तु। हिरण्यको विमृश्योवाद। पुनर्जलाशये प्राप्ते मन्थरस्य कुशलम्। स्थले गच्छतोऽस्य को विधिः। यतः

अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम्।
स्वभूमिः श्वापदादीनां राज्ञां सैन्यं परं बलम् ॥४२॥

तथापि तद्वचनमवधीर्य महता भयेन मन्थरो जलाशयमुत्सृज्य प्रचलितः। तेऽपि हिरण्यकादयस्तमनुजग्मुः। ततः स्थले गच्छन् केनापि व्याधेन वन पर्यटता स मन्थरः प्राप्तः। स च तं गृहीत्वोत्थाप्य धनुषि बद्ध्वा धन्योऽस्मीत्यभिधाय स्वगृहाभिमुखं प्रस्थितः।

अथ ते मृगवायसमूषिकाः परं विषादमुपगतास्तमन्वगमन्। ततो हिरण्यको व्यलपत्।

> एकस्य दुःखस्य न यावदन्तं
> गच्छाम्यहं पारमिवार्णवस्य।
> तावद्द्वितीयं समुपस्थितं मे
> छिद्रेष्वनर्था बहुलीभवन्ति ॥४३॥

अहो मम दुर्दैवम्।

> स्वकर्मसन्तानविचेष्टितानि
> कालान्तरावृत्तिशुभाशुभानि।

इहैव दृष्टानि मयैव तानि
जन्मान्तराणीव दशान्तराणि ॥४४॥

अपरेऽप्यमेतत् ।

कायः संनिहितापायः सम्पदः पदमापदाम् ।
समागमाः सापगमाः सर्वमुत्पादि भंगुरम् ॥४५॥

अहो नु भोः ।

मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ४६

इति बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह । यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम् । तावूचतुः । सत्वरं यथाकार्यमुपदिश । हिरण्यको ब्रूते । चित्राङ्गो जलाभ्यर्णं गत्वा मृतमिवात्मानं निश्चेष्टं दर्शयतु । काकश्च तस्योपरि स्थित्वा चञ्च्वा किमपि लिखतु । नूनमनेन लुब्धकेन मृगमांसार्थिना तत्र कच्छपं विहाय तूर्णं गन्तव्यम् । ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि । ततश्चित्राङ्गलघुपतनकाभ्यां शीघ्रं तत्र गत्वा तथाऽनुष्ठिते सति स व्याधः परिश्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टः संस्तथाविधं मृगमवलोक्य कच्छपं जलसमीपे निधाय कर्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः । अत्रान्तरे हिरण्यकेनागत्य छिन्नबन्धनः स कूर्मो द्राग्जलाशयं प्रविष्टः । स च मृग आसन्नं तं व्याधं विलोक्योत्थाय द्रुतं पलायितः । प्रत्यावृत्य लुब्धको

दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम् ।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥९॥
सामन्तराजसंघैश्च बलिकर्मभिरावृताम् ।
नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥१०॥
प्रासादै रत्नविकृतैः पर्वतैरिव शोभिताम् ।
कूटागारैश्च सम्पूर्णामिन्द्रस्येवामरावतीम् ॥११॥
चित्रामष्टपदाकारां वरनारीगणायुताम् ।
सर्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥१२॥
गृहगाढामविच्छिद्रां समभूमौ निवेशिताम् ।
शालितण्डुलसम्पूर्णामिक्षुकाण्डरसोदकाम् ॥१३॥
दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा ।
नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ॥१४॥
विमानमिव सिद्धानां तपसाधिगतं दिवि ।
सुनिवेशितवेश्मान्तां नरोत्तमसमावृताम् ॥१५॥
ये च बाणैर्न विध्यन्ति विविक्तमपरापरम् ।
शब्दवेध्यं च विततं लघुहस्ता विशारदाः ॥१६॥
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने ।
हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥१७॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ॥१८॥

द्युतिं स्फुरति च [illegible] निर्मला [illegible]।
[illegible] कुलधर्मः [illegible] ॥१७॥
[illegible]।

४—अयोध्यावर्णनम्।

कोसलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥१॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता।
मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम्॥२॥
आयता दश च द्वे च योजनानि महापुरी।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा॥३॥
राजमार्गेण महता सुविभक्तेन शोभिता।
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः॥४॥
तां तु राजा दशरथो महाराष्ट्रविवर्धनः।
पुरीमावासयामास दिवि देवपतिर्यथा॥५॥
कपाटतोरणवतीं सुविभक्तान्तरापणाम्।
सर्वयन्त्रायुधवतीमुषितां सर्वशिल्पिभिः॥६॥
सूतमागधसम्बाधां श्रीमतीमतुलप्रभाम्।
उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलाम्॥७॥
वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीम्।
उद्यानाम्रवणोपेतां महतीं सालमेखलाम्॥८॥

दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम् ।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥६॥
सामन्तराजसंघैश्च बलिकर्मभिरावृताम् ।
नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥१०॥
प्रासादै रत्नविकृतैः पर्वतैरिव शोभिताम् ।
कूटागारैश्च सम्पूर्णामिन्द्रस्येवामरावतीम् ॥११॥
चित्रामष्टपदाकारां वरनारीगणायुताम् ।
सर्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥१२॥
गृहगाढामविच्छिद्रां समभूमौ निवेशिताम् ।
शालितण्डुलसम्पूर्णामिक्षुकाण्डरसोदकाम् ॥१३॥
दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा ।
नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ॥१४॥
विमानमिव सिद्धानां तपसाधिगतं दिवि ।
सुनिवेशितवेश्मान्तां नरोत्तमसमावृताम् ॥१५॥
ये च बाणैर्न विध्यन्ति विविक्तमपरापरम् ।
शब्दवेध्यं च विततं लघुहस्ता विशारदाः ॥१६॥
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने ।
हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥१७॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ॥१८॥

तामग्निमद्भिर्गुणवद्भिराशृतां
द्विजोत्तमैर्वेदषडङ्गपारगैः ।
सहस्रदैः सत्यरतैर्महात्मभि-
र्महर्षिकल्पैऋ्षिभिश्च केवलैः ॥१८॥

श्रीमद् वाल्मीकि रामायणस्य बालकाण्डतः ।

९—क्षत्रियकुमारः ।

नेपथ्ये कलकलः ।

जनकः—अद्य खलु शिष्टानध्याय इत्युद्धतं खेलतां बटूनां कलकलः ।

कौशल्या—सुलभसौख्यं तावद्बाल्यं भवति । (निरूप्य) अहो एतेषां मध्ये क एष रामभद्रलक्ष्मीसदृशैः सायष्टंभमुग्धललितैरंगैरस्माकमपि लोचनानि शीतलयति ।

अरुन्धती—(सहर्षोत्कण्ठं स्वगतम्) इदं नाम तद्भागीरथी-निवेदितरहस्यं कर्णामृतम् । नत्वेवं विद्मः कतरो-ऽयमायुष्मतोः कुशलवयोरिति ।

जनकः—

कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
बटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन् ।
पुनरिव शिशुर्भूत्वा वत्सः स मे रघुनन्दनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥१॥

कञ्चुकी—नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये ।

मुखचन्द्रम्। (चिबुकमुन्नमय्य निरूप्य च सबा-
ष्पम्) राजर्षे किं न पश्यसि निपुणं निरूप्यमाण-
मस्य मुखं वत्साया वध्वा मुखचन्द्रेण संवदत्येव।

जनकः—पश्यामि सखि पश्यामि।

कौसल्या—अहो उन्मत्तीभूतमिव मे हृदयं किमपि चिन्तयद्वि-
प्रलपति।

जनकः—

यस्मात्पारस्य रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
संपूर्णप्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा दैव किमुत्पथैर्मम मनः पारिप्लवं धावति॥२

कौसल्या—अस्ति ते माता। स्मरसि वा तातम्।

लवः—न हि न हि।

कौसल्या—ततः कस्य त्वम्।

लवः—भगवतो वाल्मीकेः।

कौसल्या—अयि जात कथयितव्यं कथय।

लवः—एतावदेव जानामि।

(नेपथ्ये)

भो भोः सैनिकाः एष खलु कुमारचन्द्रकेतुराज्ञापयति।
न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति।

अरुन्धतीजनकौ—अये मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्र-
केतुरपि द्रष्टव्य इत्यहो सुदिवसः।

कौसल्या—वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीत्यमृतबिन्दु-
सुन्दराण्यक्षराणि श्रूयन्ते।

लवः—आर्य क एष चन्द्रकेतुर्नाम।

जनकः—जानासि रामलक्ष्मणौ दाशरथी ।

लवः—एतावेव रामायणकथापुरुषौ ।

जनकः—अथ किम्

लवः—तौ कथं न जानामि ।

जनकः—तस्य लक्ष्मणस्यात्मजश्चन्द्रकेतुः ।

लवः—ऊर्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः ।

अरुन्धती—(विहस्य) आविष्कृतं कथाप्रावीण्यं वत्सेन ।

जनकः—(विचिन्त्य) यदि त्वमीदृशः कथायामभिज्ञस्तद् ब्रूहि तावत्पृच्छामस्तेषां दशरथात्मजानां किंनामधेयान्यपत्यानि केषु केषु दारेषु प्रसूतानि ।

लवः—नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्वः ।

जनकः—किं न प्रणीत एव कविना ।

लवः—प्रणीतो न तु प्रकाशितः । तस्यैव खलु कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतः । तं च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भरतस्य मुनेः ।

जनकः—किमर्थम् ।

लवः—स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति ।

जनकः—सर्वमिदमस्माकमाकूतकरम् ।

लवः—महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था । केषांचिदन्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितम् । तेषामनुयात्रिकश्चापपाणिरप्रमादार्थमस्मद्भ्राता प्रेषितः ।

कौशल्या—भ्राताऽपि तेऽस्ति ।

लवः—अस्त्यार्यः कुशो नाम ।

कौशल्या—ज्येष्ठ इति भणितं भवति ।

लवः—एवमेतत् । प्रसवक्रमेण स किल ज्यायान् ।

मुखचन्द्रम् । (चिबुकमुन्नमय्य निरूप्य च स
ष्यम्) राजर्षे किं न पश्यसि निपुणं निरूप्यमा
अस्य मुखं यन्मात्रा वध्वा मुखचन्द्रेण संवदत्येव

जनकः—पश्यामि सखि पश्यामि ।

कौशल्या—अहो उन्मत्तीभूतमिव मे हृदयं किमपि चिन्तयद्ब
विप्रलपति ।

जनकः—

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
संपूर्णप्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा दैव किमुत्पथैर्मम मनः पारिप्लवं धावति ॥

कौशल्या—अस्ति ते माता । स्मरसि वा तातम् ।

लवः—न हि न हि ।

कौशल्या—ततः कस्य त्वम् ।

लवः—भगवतो वाल्मीकेः ।

कौशल्या—अयि जात कथयितव्यं कथय ।

लवः—एतावदेव जानामि ।

(नेपथ्ये)

भो भोः सैनिकाः एष खलु कुमारश्चन्द्रकेतुराज्ञापयति
न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति ।

अरुन्धतीजनकौ—अये मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्र
केतुरद्य द्रष्टव्य इत्यहो सुदिवसः ।

कौशल्या—वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीत्यमृतबिन्दु
सुन्दराण्यक्षराणि श्रूयन्ते ।

लवः—आर्य क एष चन्द्रकेतुर्नाम ।

जनकः—जानासि रामलक्ष्मणौ दाशरथी।

लवः—एतावेव रामायणकथापुरुषौ।

जनकः—अथ किम्

लवः—तौ कथं न जानामि।

जनकः—तस्य लक्ष्मणस्यात्मजश्चन्द्रकेतुः।

लवः—ऊर्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः।

अरुन्धती—(विहस्य) आविष्कृतं कथाप्रावीण्यं वत्सेन।

जनकः—(विचिन्त्य) यदि त्वमीदृशः कथायामभिज्ञस्तद् ब्रूहि तावत्पृच्छामस्तेषां दशरथात्मजानां कियन्त्यपत्यानि केषु केषु दारेषु प्रसूतानि।

लवः—नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्वः।

जनकः—किं न प्रणीत एव कविना।

लवः—प्रणीतो न तु प्रकाशितः। तस्यैव खलु कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतः। तं च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भरतस्य मुनेः।

जनकः—किमर्थम्।

लवः—स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति।

जनकः—सर्वमिदमस्माकमाकूतकरम्।

लवः—महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था। केन-चिदन्तेवासिना हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितम्। तेषामनुयात्रिकश्चापपाणिरप्रमादार्थमस्मद्भ्राता प्रेषितः।

कौसल्या—जात भ्राताऽपि तेऽस्ति।

लवः—अस्त्यार्यः कुशो नाम।

कौसल्या—ज्येष्ठ इति भणितं भवति।

लवः—एवमेतत्। प्रसवक्रमेण स किल ज्यायान्।

जनकः—यमजावायुष्मन्तौ ।
लवः—अथ किम् ।
जनकः—कथय कथाप्रबन्धस्य कीदृशः पर्यन्तः ।
लवः—अलीकपौरप्रवादोद्विग्नेन राज्ञा निर्वासितां देवयजनसम्भवां सीतादेवीमासन्नप्रसववेदनामेकाकिनीमरण्ये परित्यज्य लक्ष्मणः प्रतिनिवृत्त इति ।
कौशल्या—हा वत्से मुग्धचन्द्रमुखि क इदानीं ते शरीरकुसुमस्य दैवदुर्विलासपरिणाम एकाकिन्या निपतितः ।
जनकः—हा वत्से ।

नूनं त्वया परिभवं च नवं च घोरं
तां च व्यथां प्रसवकालकृतामवाप्य ।
क्रव्याद्गणेषु परितः परिवारयत्सु
संत्रस्तया शरणमित्यसकृत् स्मृतोऽस्मि ॥ ३ ॥

लवः—(अरुन्धतीं प्रति) आर्ये कावेतौ ।
अरुन्धती—इयं कौशल्या । अयं जनकः ।
लवः—(सबहुमानखेदकौतुकं पश्यति)

(प्रविश्य) सम्भ्राता बटवः—कुमार अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेषु श्रूयते सोऽयमधुनाऽस्माभिः प्रत्यक्षीकृतः ।
लवः—अश्व इति पशुसमाम्नाये सांग्रामिके च पठ्यते । तद् ब्रूत कीदृशः ।
बटवः—श्रूयताम्

पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।

शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं वा व्याख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः॥४॥

(इत्युपसृत्याजिने हस्तयोश्चाकर्षन्ति)

लवः—(सकौतुकोपरोधविनयम्) आर्याः पश्यत पश्यतैभिर्नीतोऽस्मि। (इति त्वरितं परिक्रामति)

अरुन्धतीजनकौ—पूर्यतु कौतुकं वत्सः।

कौशल्या—आनान्वेतमनालोकयन्ती न जीवामीव। अतोऽन्यतो भूत्वा प्रेक्षामहे तावद् गच्छन्तं दीर्घायुषम्।

अरुन्धती—दूरमतिक्रान्तः स चपलः कथं दृश्यते।

(प्रविश्य)

कञ्चुकी—भगवान् वाल्मीकिराह ज्ञातव्यमेतदवसरे भवद्भिरिति

जनकः—अतिगम्भीरमेतत् किमपि भविष्यति। भगवति अरुन्धति सखि कौशल्ये आर्यगृष्टे स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः।

(निष्क्रान्तो वृद्धवर्गः)

बटवः—पश्यतु कुमारस्तदाश्चर्यम्।

लवः—दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्व इति।

बटवः—कथं ज्ञायते।

लवः—ननु मूर्खाः पठितमेव युष्माभिस्तत्काण्डे। किं न पश्यत प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारस्तत्प्रायमेव बलमिदं दृश्यते। यदीह न प्रत्ययस्तर्हि गत्वा पृच्छत।

बटवः—भो भोः किम्प्रयोजनोऽयमश्वः परिवृतः पर्यटति।

लवः—(सस्पृहमात्मगतम्) अये अश्वमेध इति विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रियपरिभावी महानुत्कर्षनिकषः।

(नेपथ्ये)

अयमश्वः पताकेयमथवा वीरघोषणा ।

सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ ५ ॥

लवः—(सव्ययमिव) अहो सन्दीपनान्यक्षराणि ।

बटवः—किमुच्यते । प्राज्ञः खलु कुमारः ।

लवः—भो भोस्तत्किमक्षत्रिया पृथ्वी यदेवमुदीर्यते ।

(नेपथ्ये)

अरे महाराजं प्रति कुतः क्षत्रियाः ।

लवः—धिग्जाल्मान् ।

यदि ते सन्ति सन्त्येव केयमन्या विभीषिका ।

किमुक्तैः सन्निपत्यैव पताकां वो हराम्यहम् ॥६॥

भो भो बटवः लोष्टैरभिघ्नन्तः परावर्तयतैनमश्वम् । एष रोहितानां मध्ये चराकश्चरतु ।

(प्रविश्य)

सक्रोधदर्पः पुरुषः—धिक् चापलं किमुक्तवानसि तीक्ष्णनीरसा ह्यायुधीयश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते । राजपुत्रश्चन्द्रकेतुरविमर्दनः सौम्यपूर्वारण्यदर्शनकुतूहलाक्षिप्तहृदयो न यावदायाति तावत्त्वरितमनेन तरुगहनेनापसर्पत ।

बटवः—कुमार कृतमनेनाश्वेन । तर्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेणयः । दूरे चाश्रमपदम् । तदेहि । हरिणप्लुतैः पलायामहे ।

लवः—(विहस्य) किं नाम विस्फुरन्ति शस्त्राणि । तद्धि धनुरास्यहमपि ।

उत्तररामचरितस्य चतुर्थोऽङ्कात् ।

६—सुहृद्वचनम् ।

सखे पुण्डरीक नैतदनुरूपं भवतः । क्षुद्रजनक्षुण्ण एष र्गः । धैर्यधना हि साधवः । किं यः कश्चित्प्राकृत इव विक्ल- भवन्तमात्मानं न रुणत्सि । कुतस्तवापूर्वोऽयमद्येन्द्रियो- प्लवो येनास्येवं कृतः । क्व ते तद्धैर्यम् । क्वासाविन्द्रियजयः । तद्वशित्वं चेतसः । क्व सा प्रशान्तिः । क्व तत्कुलक्रमागतं ह्मचर्यम् । क्व सा सर्वविषयनिरुत्सुकता । क्व ते गुरूपदेशाः । तानि श्रुतानि । क्व सा वैराग्यबुद्धयः । क्व तदुपभोगविद्वे- षित्वम् । क्व सा सुखपराङ्मुखता । क्वासौ तपस्यभिनिवेशः । भोगानामुपर्यरुचिः । क्व तद्यौवनानुशासनम् । सर्वथा नि- ष्फला प्रज्ञा । निर्गुणो धर्मशास्त्राभ्यासः । निरर्थकः संस्कारः । निरुपकारको गुरूपदेशविवेकः । निष्प्रयोजना प्रबुद्धता । निष्कारणं ज्ञानम् । यदत्र भवादृशा अपि रागाभिषङ्गैः कलुषी- क्रियन्ते । प्रमादैश्चाभिभूयन्ते । कथं करतलाद्गलितामपहृता- मक्षमालामपि न लक्षयसि । अहो विगतचेतनत्वम् । अपहृता मेयम् । इदमपि तावदपह्रियमाणमनयाऽनार्यया निवार्यतां हृदयम् ।

कादम्बरीतः ।

७—शस्त्रविद्याप्रदर्शनम् ।

वैशंपायन उवाच ।

कृतास्त्रान् धार्तराष्ट्रांश्च पाण्डुपुत्रांश्च भारत ।
दृष्ट्वा द्रोणोऽब्रवीद्राजन् धृतराष्ट्रं जनेश्वरम् ॥१॥

(नेपथ्ये)

अयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ ५ ॥

लवः—(सस्पृहमिव) अहो सन्दीपनान्यक्षराणि ।

बटवः—किमुच्यते । प्राज्ञः खलु कुमारः ।

लवः—भो भोस्तत्किमक्षत्रिया पृथ्वी यदेवमुद्घोष्यते ।

(नेपथ्ये)

रे महाराजं प्रति कुतः क्षत्रियाः ।

लवः—धिग्जाल्मान् ।

यदि ते सन्ति सन्त्येव केयमन्या विभीषिका ।
किमुक्तैः सन्निपत्यैव पताकां यो हराम्यहम् ॥ ६ ॥

भो भो बटवः लोष्टैरभिघ्नन्तः परावर्तयतैनमश्वम् । एष रोहितानां मध्ये चराकश्चरतु ।

(प्रविश्य)

सक्रोधदर्पः पुरुषः—धिक् चापलं किमुक्तवानसि तीक्ष्णनीरसा ह्यायुधीयश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते । राजपुत्रश्चन्द्रकेतुररिविमर्दनः सौम्यपूर्वारण्यदर्शनकुतूहलाक्षिप्तहृदयो न यावदायाति तावत्त्वरितमनेन तरुगहनेनापसर्पत ।

बटवः—कुमार कृतमनेनाश्वेन । तर्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेणयः । दूरे चाश्रमपदम् । तदेहि । हरिणप्लुतैः पलायामहे ।

लवः—(विहस्य) किं नाम विस्फुरन्ति शस्त्राणि । तर्हि पश्याम्यहमपि ।

उत्तररामचरितस्य चतुर्थाङ्कात् ।

राजन् संप्राप्तविद्यास्ते कुमाराः कुरुसत्तम।
ते दर्शयेयुः स्वां शिक्षां राजन्ननुमते तव ॥२॥

धृतराष्ट्र उवाच।

भारद्वाज महत्कर्म कृतं ते द्विजसत्तम।
यदानुमन्यसे कालं यस्मिन्देशे यथा यथा ॥३॥
तथा तथा विधानाय स्वयमाज्ञापयस्व माम्।
स्पृहयाम्यद्य निर्वेदात् पुरुषाणां सचक्षुषाम् ॥४॥
अस्त्रहेतोःपराक्रान्तान् ये मे द्रक्ष्यन्ति पुत्रकान्।
क्षत्तर्यद्गुरुराचार्यो ब्रवीति कुरु तत्तथा ॥५॥
नहीदृशं प्रियं मन्ये भविता धर्मवत्सल।
ततो राजानमामन्त्र्य विदुरानुमतोऽपि हि ॥६॥
भारद्वाजो महाप्राज्ञो मापयामास मेदिनीम्।
रंगभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि ॥७॥
प्रेक्षागारं सुविहितं चक्रुस्ते तस्य शिल्पिनः।
राज्ञां सर्वायुधोपेतां स्त्रीणां चैव नरर्षभ ॥८॥
मंचांश्च कारयामासुर्यत्र जानपदा जनाः।
विपुलानुच्छ्रयोपेताञ्छिबिकाश्च महाधनाः ॥९॥
तस्मिंस्ततोऽहनि प्राप्ते राजा ससचिवस्तदा।
सान्तःपुरः सहामात्यो व्यासस्यानुमते तदा ॥१०॥
भीष्मं प्रमुखतः कृत्वा कृपं चाचार्यसत्तमम्।
कुरूनन्यांश्च सचिवानादाय नगराद्बहिः ॥११॥

गन्धर्वनगराकारं प्रेक्ष्य ते विस्मिताभवन् ।
सहसा चुक्रुशुश्चान्ये नराः शतसहस्रशः ॥२२॥
विस्मयोत्फुल्लनयनाः साधु साध्विति भारत ।
कृत्वा धनुषि ते मार्गान् रथचर्यासु चामकृत् ॥२३॥
गजपृष्ठेऽश्वपृष्ठे च नियुद्धे च महाबलाः ।
गृहीतखड्गचर्माणस्ततोभूयः प्रहारिणः ॥२४॥
त्सरुमार्गान्यथोद्दिष्टांश्चेरुः सर्वासु भूमिषु ।
विदुरो धार्तराष्ट्राय गान्धार्याः पाण्डवारणिः ।
न्यवेदयेतां तत्सर्वं कुमाराणां विचेष्टितम् ॥२५॥

महाभारतस्य आदिपर्वतः ।

८—अलसकथा ।

उद्योगहेतुरुत्साहः प्राणिधर्मो निगद्यते ।
क्रियासु सर्वरूपासु विना तेनालसो भवेत् ॥१॥

आसीन्मिथिलायां वीरेश्वरो नाम मन्त्री । स च स्वभावदानशीलः कारुणिकश्च सर्वेभ्यो दुर्गतेभ्यः प्रत्यहमिच्छाभोजनं ददाति । तन्मध्येऽप्यलसेषु वस्त्राण्यपि दापयति । यतः

निर्गतीनां च सर्वेषामलसः प्रथमो मतः ।
किंचिन्न क्षमते कर्तुं जाठरेणापि वह्निना ॥२॥

अथ वा परमसुखस्थानमालस्यम् । यतः

कुत्रापि तिष्ठति मनः कथिदङ्गकानि
नात्मा चिकीर्षति गिरा श्रममभ्युपैति ।

आलस्यमाश्रयगतस्य नरस्य मन्ये
निद्रासुखं हरति जाठर एष वह्निः ॥३॥

ततोऽलसपुरुषाणां तत्राश्रमेऽप्यलाभाद्दपरस्तुन्दपरिमृजा-स्तत्र वर्तुलीबभूवुः ।

पश्चादलसानां सुखं दृष्ट्वा धूर्ता अपि कृत्रिमालस्यं दर्शयित्वा भोज्यं गृह्णन्ति । तदनन्तरमेतस्यां शालायां बहुद्रव्यव्ययं दृष्ट्वा तन्नियोगिपुरुषैः परामृष्टं यदलसमनुष्यपालनकरुणया केवलमलसेभ्यः स्वामी वस्तूनि दापयति कपटेनानलसा अपि गृह्णन्तीत्यस्माकं प्रमादः । तदस्मद्दोषेण स्वामिधनं वृथा विनष्टं भवतीत्यतो यथार्थालसानां परीक्षामहे । इत्यालोच्य प्रसुप्तेष्वलसशालायां ते नियोगिपुरुषा वह्निं दापयित्वा निरूपयामासुः । ततो गृहलग्नं प्रवृद्धमग्निं दृष्ट्वा धूर्ताः सर्वे पलायिताः । पश्चादीषदलसा अपि पलायिताः । चत्वारः पुरुषास्तत्रैव सुप्ताः परस्परमालपन्ति । एकेन वस्त्रावृतमुखेनोक्तम् । अहो कथमयं कोलाहलः । द्वितीयेनोक्तम् । तर्कयते यदस्मिन् गृहेऽग्निर्लग्नोऽस्ति । तृतीयेनोक्तम् । कोऽपि तथा धार्मिको नास्ति य इदानीं जलार्द्रैर्वासोभिः कटैर्वा मावृणोति । चतुर्थेनोक्तम् । अये वाचाला कति वचनानि वक्ष्यथ । तूष्णीं तिष्ठत । ततश्चतुर्णामेव तेषां परस्परालापं श्रुत्वा वह्निं च तेषामुपरि पतितं विलोक्य नियोगिपुरुषैः केशेष्वाकृष्य गृहीत्वा ते बहिष्कृताः । पश्चात्तानवलोक्य पठितम् ।

पतिरेव गतिः स्त्रीणां बालानां जननी गतिः ।
नालसानां गतिः काचिल्लोके कारुणिकं विना ॥४॥

पश्चात्तेषु चतुर्ष्वलसेषु पूर्वतोऽप्यधिकतरं वस्तु स्वामी दापयामास ।

पुरुषपरीक्षा ।

कच्चिद् धृष्टश्च शूरश्च मतिमान् धृतिमाञ्छुचिः ।
कुलीनश्चानुरक्तश्च दक्षः सेनापतिस्तव ॥२०॥
कच्चिद्बलस्य ते मुख्याः सर्वयुद्धविशारदाः ।
धृष्टावदाना विक्रान्तास्त्वया सत्कृत्य मानिताः ॥२१॥
कच्चिद् बलस्य भक्तं च वेतनं च यथोचितम् ।
सम्प्राप्तकाले दातव्यं ददासि न विकर्षसि ॥२२॥
कच्चित् पुरुषकारेण पुरुषः कर्म शोभयन् ।
लभते मानमधिकं भूयो वा भक्तवेतनम् ॥२३॥
कच्चिद् दारान् मनुष्याणां तवार्थे मृत्युमीयुषाम् ।
व्यसनं चाभ्युपेतानां बिभर्षि भरतर्षभ ॥२४॥
कच्चिद् भयादुपनतं क्लीबं वा रिपुमागतम् ।
युद्धे वा विजितं पार्थ पुत्रवत् परिरक्षसि ॥२५॥
कच्चिद् व्यसनिनं शत्रुं निशम्य भरतर्षभ ।
अभियासि जवेनैव समीक्ष्य त्रिविधं बलम् ॥२६॥
कच्चिदात्मानमेवाग्रे विजित्य विजितेन्द्रियः ।
परान् जिगीषसे पार्थ प्रमत्तानजितेन्द्रियान् ॥२७॥
कच्चित् कोशस्य कोष्ठं च वाहनं द्वारमायुधम् ।
आयस्य कृतकल्याणैस्तव भक्तैरनुष्ठितः ॥२८॥
कच्चिज्ज्ञातीन् गुरून् वृद्धान् वणिजः शिल्पिनः श्रितान् ।
अभीक्ष्णमनुगृह्णासि धनधान्येन दुर्गतान् ॥२९॥

कच्चिन्न लुब्धाश्चौरा वा वैरिणो वा विशांपते।
अप्राप्तव्यवहारा वा तव कर्मस्वनुष्ठिताः ॥३०॥
कच्चिद्रक्ताम्बरधराः खड्गहस्ताः स्वलंकृताः।
उपासते त्वामभितो रक्षणार्थमरिन्दम ॥३१॥
कच्चिद् दण्ड्येषु यमवत् पूज्येषु च विशांपते।
परीक्ष्य वर्तसे सम्यगप्रियेषु प्रियेषु च ॥३२॥
कच्चित्सर्वेऽनुरक्तास्त्वां भूमिपालाः प्रधानतः।
कच्चित्प्राणांस्त्वदर्थेषु संत्यजन्ति त्वयाऽऽहृताः॥३३॥
कच्चिदेषा च ते बुद्धिर्वृत्तिरेषा च तेऽनघ।
आयुष्या च यशस्या च धर्मकामार्थदर्शिनी ॥३४॥
एतया वर्तमानस्य बुद्ध्या राष्ट्रं न सीदति।
विजित्य च महीं राजा सोऽत्यन्तं सुखमेधते॥३५॥

युधिष्ठिर उवाच।

भगवन्न्याय्यमाहैतं यथावद्धर्मनिश्चयम्।
यथाशक्ति यथान्यायं क्रियतेऽयं विधिर्मया ॥३६॥

महाभारतस्य सभापर्वतः।

१०—समस्या

ततः प्रविशति पत्नीसहितः कोऽपि विलोचनो विद्वान् "स्वस्ति" इत्युक्त्वा आह—

निजानपि गजान्भोजं ददानं प्रेक्ष्य पार्वती ।
गजेन्द्रवदनं पुत्रं रक्षत्यद्य पुनः पुनः ॥१॥

ततो राजा भोजः शतगजांस्तस्मै ददौ ।

ततो राजा विद्वत्कुटुम्बं तत्रैव पुरतः स्थितं वीक्ष्य ब्राह्मणं प्राह ।

"क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ।"

वृद्धद्विजः प्राह ।

घटो जन्मस्थानं मृगपरिजनो भूर्जवसनो
वने वासः कन्दादिकमशनमेवंविधगुणः ।
अगस्त्यः पाथोधिं यदकृत कराम्भोजकुहरे
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥२॥

ततो राजा बहुमूल्यानपि षोडशमणींस्तस्मै ददौ । ततस्तत्पत्नी प्राह ।

राजा—अम्ब त्वमपि पठ ।

देवी—

रथस्यैकं चक्रं भुजगयमिताः सप्ततुरगाः
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥३॥

राजा तुष्टः सप्तदशगजान्सप्तरत्नांश्च तस्मै ददौ । ततो विप्रपुत्रं प्राह राजा—विप्रसुत त्वमपि पठ ।

विप्रसुतः—

विजेतव्या लंका चरणतरणीयो जलनिधि-
र्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः।
पदातिर्मर्त्योऽसौ सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥४॥

तुष्टो राजा विप्रसुतायाष्टादशगजेन्द्रान्प्रादात् । ततः सुकुमारमनोज्ञनिखिलाङ्गावयवयालंकृतां शृङ्गाररसोपजातमूर्तिमिव चम्पकलतामिव लावण्यपात्रयष्टिं विप्रस्नुषां वीक्ष्य "नूनं भारत्याः काऽपि लीलाकृतिरियम्" इति चेतसि नमस्कृत्य राजा प्राह—मातः त्वमप्याशिषं वद ।

विप्रस्नुषा—देव शृणु ।

धनुः पौष्पं मौर्वी मधुकरमयी चञ्चलदृशां
दृशां कोणो बाणः सुहृदपि जडात्मा हिमकरः।
स्वयं चैकोऽनङ्गः सकलभुवनं व्याकुलयति
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥५॥

चमत्कृतो राजा लीलादेवीभूषणानि सर्वाण्यानाय्य तस्यै ददौ । अनर्घ्यांश्च सुवर्णमौक्तिकवैदूर्यप्रवालांश्च प्रददौ ।

— भोजप्रबन्धात् ।

११—अन्योक्तयः ।

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव काऽपि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्तहृद्या
विद्यावतां सकलमेव गिरां दवीयः ॥ १ ॥

तावत्कोकिल विरसान्
यापय दिवसान्वनान्तरे निवसन् ।
यावन्मिलदलिमालः
कोऽपि रसालः समुल्लसति ॥ २ ॥

नितरां नीचोऽस्मीति
त्वं खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो
यतः परेषां गुणग्रहीतासि ॥ ३ ॥

अयि मलयज महिमाऽयं
कस्य गिरामस्तु विषयस्ते ।
उद्गिरतो यद्गरलं
फणिनः पुष्णासि परिमलोद्गारैः ॥ ४ ॥

नीरक्षीरविवेके
हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्यः
कुलव्रतं पालयिष्यति कः ॥ ५ ॥

गुञ्जति मञ्जु मिलिन्दे
मालति मा मौनमुपयासीः ।
शिरसा वदान्यगुरवः
सादरमेनं वहन्ति सुरतरवः ॥ ६ ॥

एकस्त्वं गहनेऽस्मिन्
कोकिल न कलं कदाचिदपि कुर्याः ।
साजात्यशंकयाऽमी
न त्वां निघ्नन्ति निर्दयाः काकाः ॥ ७ ॥

किं खलुरत्नैरेतैः
किं पुनरभ्रायितेन वपुषा ते ।
सलिलमपि यस्य तावक-
मर्णव वदनं प्रयाति तृषितानाम् ॥ ८ ॥

धीरध्वनिभिरलं ते
नीरद मे मासिको गर्भः ।
उन्मदवारणबुध्या
मध्येजठरं समुच्छलति ॥ ९ ॥

विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः ।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव ॥ १० ॥

वंशभवो गुणवानपि
संगविशेषेण पूज्यते पुरुषः ।

११—अन्योक्तयः ।

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव काऽपि रचना वचनावलीनाम्।
लोकोत्तरा च कृतिराकृतिरार्तहृद्या
विद्यावतां सकलमेव गिरां दवीयः ॥ १ ॥

तावत्कोकिल विरसान्
यापय दिवसान्वनान्तरे निवसन् ।
यावन्मिलदलिमालः
कोऽपि रसालः समुल्लसति ॥ २ ॥

नितरां नीचोऽस्मीति
त्वं खेदं कूप मा कदापि कृथाः ।
अत्यंतसरसहृदयो
यतः परेषां गुणग्रहीतासि ॥ ३ ॥

अयि मलयज महिमाऽयं
कस्य गिरामस्तु विषयस्ते ।
उद्गिरतो यद्गरलं
फणिनः पुष्णासि परिमलोद्गारैः ॥ ४ ॥

नीरक्षीरविवेके
हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनाऽन्यः
कुलव्रतं पालयिष्यति कः ॥ ५ ॥

गुञ्जति मञ्जु मिलिन्दे
मालति मा मौनमुपयासीः ।
शिरसा वदान्यगुरवः
सादरमेनं वहन्ति सुरतरवः ॥ ६ ॥

पञ्चत्वं गतेऽस्मिन्
कोकिल न कलं कदाचिदपि कुर्याः ।
मार्जारघर्षकायाऽमी
न त्वां निघ्नन्ति निर्दयाः काकाः ॥ ७ ॥

किं खलु रत्नैरेतैः
किं पुनरभ्रायितेन वपुषा ते ।
सलिलमपि यत्र तावक-
मर्णव वदनं प्रयाति तृषितानाम् ॥ ८ ॥

धीरध्वनिभिरलं ते
नीरद मे मासिको गर्भः ।
उन्मदवारणबुद्ध्या
मध्येजठरं समुच्छलति ॥ ९ ॥

विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः ।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव ॥ १० ॥

वंशभवो गुणवानपि
सङ्गविशेषेण पूज्यते पुरुषः ।

अ पि दुर्लभतालिनतां
[illegible] ॥ ११ ॥

पतितपोषित यान्तीं
[illegible] निर्मितां करोति ।

निर्भरतापमयीमां
गर्भवतीमिव सद्गुन इव ॥ १२ ॥

निरयो पुण्यश्चर्योऽन्यूनां
पृथ्वीं करोति प्रकटयन् ।

मायाद्यभिनिवृत्तः
प्रभवंत्यपरा महात्मानः ॥ १३ ॥

हारं यद्यपि केनापि दृष्टमचिन महोदः ।
किंतु विषयेषु संक्षिप्य करोत्युत्तममाननम् ॥ १४ ॥

विधाय मनुष्यवर्नैः
साधुत्वं सम्पादयन्ति नगरराः ।

नास्ति दयापि मानः
कारणानि नानान्यथापि च विवेकः ॥ १५ ॥

सांप्रतं मम दाक्षिण्यं मर्यादितं च संगतिः ।
तथापि हरणं नार्थं कोऽपालापुत्रतो धनः ॥ १६ ॥

न वारणानां भवनी विभूती
यद्यपि योगानि जनुगाथाः ।

न युक्तमेतत्तु पुरो यदस्या-
स्तरंगभंगान्मृकटीकरोषि ॥ १७ ॥

गिरिगह्वरेषु गुरुगर्वगुंफितो
गजराजपोत न कदाऽपि संचरेः ।
यदि बुध्यते हरिशिशुः स्तनन्धयो
भविता करेणुपरिशेषिता मही ॥ १८ ॥

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥ १९ ॥

निष्णातोऽपि च वेदान्ते साधुत्वं नैति दुर्जनः ।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥ २० ॥

भामिनीविलासस्य प्रास्ताविकविलासात् ।

१२—संकीर्णपद्यानि ।

गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥१॥

चतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान्बादरायणः ॥२॥

पलाशमुकुलभ्रान्त्या शुकतुण्डे पतत्यलिः ।
सोऽपि जम्बूफलभ्रान्त्या तमलिं धर्तुमिच्छति ॥३॥

जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः ।
किं कनिष्ठाः किमु ज्येष्ठा घटीयन्त्रस्य दुर्जनाः ॥४॥

विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥५॥

यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम् ।
न हि कस्तूरिकामोदः शपथेन विभाव्यते ॥६॥

अहो खलभुजङ्गस्य विचित्रोऽयं वधक्रमः ।
अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते ॥७॥

भवन्ति नरकाः पापात्पापं दारिद्र्यसम्भवम् ।
दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत् ॥८॥

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति ॥९॥

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥१०॥

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता ।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् ॥११॥

अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ।
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥१२॥

गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः।
वसुदेवं परित्यज्य वासुदेवं उपास्यते ॥१३॥
उदयन्तु शतमादित्या उदयन्तु शतमिन्दवः।
न विना विदुषां वाक्यैर्नश्यत्याभ्यन्तरं तमः ॥१४॥
सूर्यश्चन्द्रो घनो वृक्षो, नदी धेनुश्च सज्जनः।
एते परोपकाराय विधात्रैव विनिर्मिताः ॥१५॥
यो हि भ्रमति देशेषु सेवते च सुपण्डितान्।
तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि ॥१६॥
एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥१७॥
न केवलं मनुष्येषु दैवं देवेष्वपि प्रभु।
धनदेऽपि स्थिरं मित्रे, चर्माम्बरधरो हरः ॥१८॥
कमले कमला शेते हरः शेते हिमालये।
क्षीराब्धौ च हरिः शेते मन्ये मत्कुणशङ्कया ॥१९॥
क्षणशः कणशश्चैव विद्यामर्थं च सञ्चयेत्।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम् ॥२०॥
अधमा धनमिच्छन्ति धनमानौ च मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥२१॥
विकृतिं नैव गच्छन्ति संगदोषेण साधवः।
आवेष्टितं महासर्पैश्चन्दनं न विषायते ॥२२॥

अश्वः शस्त्रं शास्त्रं
वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता
भवन्ति योग्या अयोग्याश्च ॥२३॥

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥२४॥

गतेऽपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः ।
यद्यपि स्यान्न फलदा सुलभा साऽन्यजन्मनि ॥२५॥

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता ।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥२६॥

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥२७॥

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥२८॥

चिन्तनीया हि विपदामादावेव प्रतिक्रियाः ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥२९॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥३०॥

नानाकवीनाम् ।

१३—मन्थरामात्सर्यम् ।

प्रथमोऽध्यायः ।

ज्ञातिदासी यतो जाता कैकेय्या तु सहोषिता ।
प्रासादं चन्द्रसंकाशमारुरोह यदृच्छया ॥१॥
सिक्तराजपथां कृत्स्नां प्रकीर्णकमलोत्पलाम् ।
अयोध्यां मन्थरा तस्मात्प्रासादादन्ववैक्षत ॥२॥
पताकाभिर्वरार्हाभिर्ध्वजैश्च समलंकृताम् ।
सिक्तां चन्दनतोयैश्च शिरःस्नातजनैर्युताम् ॥३॥
माल्यमोदकहस्तैश्च द्विजेन्द्रैरभिनादिताम् ।
शुक्लदेवगृहद्वारां सर्ववादित्रनादिताम् ॥४॥
हृष्टप्रमुदितैः पौरैरुच्छ्रितध्वजमालिनीम् ।
अयोध्यां मन्थरा दृष्ट्वा परं विस्मयमागता ॥५॥
सा हर्षोत्फुल्लनयनां पाण्डुरक्षौमवासिनीम् ।
अविदूरे स्थितां दृष्ट्वा धात्रीं पप्रच्छ मन्थरा ॥६॥
उत्तमेनाभिसंयुक्ता हर्षेणार्थपरा सती ।
राममाता धनं किं नु जनेभ्यः संप्रयच्छति ॥७॥
अतिमात्रं प्रहर्षः किं जनस्यास्य च शंस मे ।
कारयिष्यति किं वाऽपि संप्रहृष्टो महीपतिः ॥८॥
विदीर्यमाणा हर्षेण धात्री तु परया मुदा ।
आचचक्षेऽथ कुब्जायै भूयसीं राघवेश्रियम् ॥९॥

श्वः पुष्येण जितक्रोधं यौवराज्येन चानघम् ।
राजा दशरथो राममभिषेक्ता हि राघवम् ॥१०॥
धात्र्यास्तु वचनं श्रुत्वा कुब्जा क्षिप्रममर्षिता ।
कैलासशिखराकारात्प्रासादादवरोहत ॥११॥
सा दह्यमाना क्रोधेन मन्थरा पापदर्शिनी ।
शयानामेव कैकेयीमिदं वचनमब्रवीत् ॥१२॥
उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते ।
उपप्लुतमघौघेन नात्मानमवबुध्यसे ॥१३॥
अनिष्टे सुभगाकारे सौभाग्येन विकत्थसे ।
चलं हि तव सौभाग्यं नद्याः स्रोत इवोष्णगे ॥१४॥
एवमुक्ता तु कैकेयी रुष्टया परुषं वचः ।
कुब्जया पापदर्शिन्या विषादमगमत्परम् ॥१५॥
कैकेयीत्वब्रवीत्कुब्जां कच्चित्क्षेमं न मन्थरे ।
विषण्णवदनां हि त्वां लक्षये भृशदुःखिताम् ॥१६॥
मन्थरा तु वचः श्रुत्वा कैकेय्या मधुराक्षरम् ।
उवाच क्रोधसंयुक्ता वाक्यं वाक्यविशारदा ॥१७॥
सा विषण्णतरा भूत्वा कुब्जा तस्यां हितैषिणी ।
विषादयन्ती प्रोवाच भेदयन्ती च राघवम् ॥१८॥
अक्षयं सुमहद्देवि प्रवृत्तं त्वद्विनाशनम् ।
रामं दशरथो राजा यौवराज्येऽभिषेक्ष्यति ॥१९॥

साऽस्म्यगाधे भये मग्ना दुःखशोकसमन्विता।
दह्यमानाऽनलेनेव त्वद्धितार्थमिहागता ॥२०॥
तव दुःखेन कैकेयि मम दुःखं महद्भवेत्।
त्वद्वृद्धौ मम वृद्धिश्च भवेदिह न संशयः ॥२१॥
नराधिपकुले जाता महिषी त्वं महीपतेः।
उग्रत्वं राजधर्माणां कथं देवि न बुध्यसे ॥२२॥
धर्मवादी शठो भर्ता श्लक्ष्णवादी च दारुणः।
शुद्धभावेन जानीषे तेनैवमतिसन्धिता ॥२३॥
उपस्थितः प्रयुञ्जानस्त्वयि सान्त्वमनर्थकम्।
अर्थेनैवाद्य ते भर्ता कौसल्यां योजयिष्यति ॥२४॥
अपवाह्य तु दुष्टात्मा भरतं तव बन्धुषु।
काल्ये स्थापयिता रामं राज्ये निहतकण्टके ॥२५॥
शत्रुः पतिप्रवादेन मात्रेव हितकाम्यया।
आशीविष इवाङ्केन बाले परिधृतस्त्वया ॥२६॥
यथा हि कुर्याच्छत्रुर्वा सर्पो वा- प्रत्युपेक्षितः।
राज्ञा दशरथेनाद्य सपुत्रा त्वं तथा कृता ॥२७॥
पापेनानृतसान्त्वेन बाले नित्यं सुखोचिता।
रामं स्थापयिता राज्ये सानुबन्धा हता ह्यसि ॥२८॥
सा प्राप्तकालं कैकेयि क्षिप्रं कुरु हितं तव।
त्रायस्व पुत्रमात्मानं मां च विस्मयदर्शने ॥२९॥

मन्थराया वचः श्रुत्वा शयनात्सा शुभानना।
उत्तस्थौ हर्षसंपूर्णा चन्द्रलेखेव शारदी ॥३०॥
अतीव सा तु सन्तुष्टा कैकेयी विस्मयान्विता।
दिव्यमाभरणं तस्यै कुब्जायै प्रददौ शुभम् ॥३१॥
दत्वा त्वाभरणं तस्यै कुब्जायै प्रमदोत्तमा।
कैकेयी मन्थरां दृष्ट्वा पुनरेवाब्रवीदिदम् ॥३२॥
इदं तु मन्थरे मह्यमाख्यातं परमं प्रियम्।
एतन्मे प्रियमाख्यातं किं वा भूयः करोमि ते ॥३३॥
रामे वा भरते वाऽहं विशेषं नोपलक्षये।
तस्मात्तुष्टाऽस्मि यद्राजा रामं राज्येऽभिषेक्ष्यति ॥३४॥

न मे परं किंचिदितो वरं पुनः
प्रियं प्रियार्हे सुवचं वचोऽमृतम्।
तथा ह्यवोचस्त्वमतः प्रियोत्तरं
वरं वरं ते प्रददामि तं वृणु ॥३५॥

१४—मन्थरामात्सर्यम्।

द्वितीयोऽध्यायः।

मन्थरा त्वभ्यसूयैनामुत्सृज्याभरणं हि तत्।
उवाचेदं ततो वाक्यं कोपदुःखसमन्विता ॥१॥
हर्षं किमिदमस्थाने कृतवत्यसि बालिशे।
शोकसागरमध्यस्थं आत्मानमवबुध्यसे ॥२॥

मनसा प्रहसामि त्वां देवि दुःखार्दिता सती ।
यच्छोचितव्ये हृष्टाऽसि प्राप्य त्वं व्यसनं महत् ॥३॥
शोचामि दुर्मतित्वं ते का हि प्राज्ञा प्रहर्षयेत् ।
अरेः सपत्नीपुत्रस्य वृद्धिं मृत्योरिवागताम् ॥४॥
भरतादेव रामस्य राज्यसाधारणाद्भयम् ।
तद्विचिन्त्य विषण्णाऽस्मि भयं भीताद्धि जायते ॥५॥
लक्ष्मणो हि महाबाहू रामं सर्वात्मना गतः ।
शत्रुघ्नश्चापि भरतं काकुत्स्थं लक्ष्मणो यथा ॥६॥
प्रत्यासन्नक्रमेणापि भरतस्यैव भामिनि ।
राज्यक्रमो विप्रकृष्टस्तु तयोस्तावत्कनीयसोः ॥७॥
विदुषः क्षत्रचारित्रे प्राज्ञस्य प्राप्तकारिणः ।
भयात् प्रवेपे रामस्य चिन्तयन्ती तवात्मजम् ॥८॥
सुभगा किल कौसल्या यस्याः पुत्रोऽभिषेक्ष्यते ।
यौवराज्येन महता श्वः पुष्येण द्विजोत्तमैः ॥९॥
प्राप्तां वसुमतीं प्रीतिं प्रतीतां हतविद्विषम् ।
उपस्थास्यसि कौसल्यां दासीवत्त्वं कृताञ्जलिः ॥१०॥
एवं च त्वं सहास्माभिस्तस्याः प्रेष्या भविष्यसि ।
पुत्रश्च तव रामस्य प्रेष्यत्वं हि गमिष्यति ॥११॥
तां दृष्ट्वा परमप्रीतां ब्रुवन्तीं मन्थरां ततः ।
रामस्यैव गुणान्देवी कैकेयी प्रशशंस ह ॥१२॥

धर्मज्ञो गुणवान्दान्तः कृतज्ञः सत्यवाक्शुचिः ।
शान्तो राजगुणो ज्येष्ठो [illegible] ॥
[illegible] दीर्घायुः [illegible] ।
[illegible] भूत्वा रामाभिषेचनम् ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible]
[illegible] ॥
[illegible]
[illegible] ॥

दर्पान्निराकृता पूर्वं त्वया सौभाग्यवत्तया ।
राममाता सपत्नी ते कथं वैरं न यापयेत् ॥३३॥

यदा च रामः पृथिवीमवाप्स्यते
प्रभूतरत्नाकरशैलसंयुताम् ।
तदा गमिष्यस्यशुभं पराभवं
सहैव दीना भरतेन भामिनि ॥३४॥

वाल्मीकीयरामायणस्यायोध्याकाण्डतः।

१२—पुत्रप्राप्तिः ।

(नेपथ्ये)

मा खलु चापलं कुरु । कथं गत एवात्मनः प्रकृतिम् । राजा (कर्णं दत्त्वा ।) अभूमिरियमविनयस्य । को नु खल्वेष निषिध्यते । (शब्दानुसारेणावलोक्य । सविस्मयम् ।) अये को नु खल्वयमनुबध्यमानस्तपस्विनीभ्यामबालसत्त्वो बालः ।

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥१॥

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां बालः)

बालः—जृम्भस्व सिंह दन्तांस्ते गणयिष्ये ।

प्रथमा—अविनीत किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि । हन्त वर्धते ते संरम्भः । स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि ।

राजा—किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः । नूनमनपत्यता मां वत्सलयति ।

द्वितीया—एषा खलु केसरिणी त्वां लंघयति यदि तस्याः पुत्रकं न मुञ्चसि ।

बालः—(सस्मितम्) अहो बलीयः खलु भीतोऽस्मि । (इत्यधरं दर्शयति ।)

राजा—

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।
स्फुलिंगावस्थया वह्निरेधोऽपेक्ष इव स्थितः ॥२॥

प्रथमा—वत्स एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि ।

बाल—कुत्र । देह्येतत् । (इति हस्तं प्रसारयति ।)

राजा—कथं चक्रवर्तिलक्षणमप्यनेन धार्यते ।

द्वितीया—सुव्रते न शक्य एष वाङ्मात्रेण विरमयितुम् । गच्छ त्वम् । मदीय उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति । तमस्योपहर ।

प्रथमा—तथा । (निष्क्रान्ता ।)

बालः—अनेनैव तावत् क्रीडिष्यामि (इति तापसीं विलोक्य हसति ।)

राजा—स्पृहयामि खलु दयितायास्मै ।

तापसी—भवतु । न मामयं गणयति । (पार्श्वमवलोकयति ।) कोऽत्र ऋषिकुमाराणाम् । (राजानमवलोक्य) भद्रमुख एहि तावत् । मोचयानेन दुर्मोकहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम् ।

राजा—(उपगम्य । सस्मितम् ।) अयि भो महर्षिपुत्र ।

एवमाश्रमविरुद्धवृत्तिना
संयमः किमिति जन्मतस्त्वया ।
सत्वसंश्रयसुखोऽपि दूष्यते
कृष्णसर्पशिशुनेव चन्दनः ॥ ३ ॥

तापसी—भद्रमुख न खल्वयमृषिकुमारः ।

राजा—आकारसदृशं चेष्टितमेवास्य कथयति । स्थानप्रत्ययात्तु वयमेवंतर्किणः । (यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य । आत्मगतम् ।)

अनेन कस्यापि कुलांकुरेण
स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्या—
द्यस्यायमङ्कात् कृतिनः प्ररूढः ॥ ४ ॥

तापसी—(उभौ निर्वर्ण्य) आश्चर्यमाश्चर्यम् ।

राजा—आर्ये किमिव ।

तापसी—अस्य बालकस्य रूपसंवादिनी ते आकृतिरिति विस्मापिताऽस्मि । अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति ।

राजा—(बालमुपलालयन्) न चेन्मुनिकुमारोऽयमथ कोऽस्य व्यपदेशः ।

तापसी—पुरुवंशः ।

राजा—(आत्मगतम् ।) कथम् । एकान्वयो मम । अतः खलु मदनुकारिणमेनमत्रभवती मन्यते । अस्त्येतत्पौरवाणामन्त्यं कुलव्रतम् ।

भवनेषु सुधासितेषु पूर्वं
क्षितिरक्षार्थमुशन्ति ये निवासम् ।

नियतैकयतिव्रतानि पश्चात्
तरुमूलानि गृहीभवन्ति तेषाम् ॥ ५ ॥

(प्रकाशम्।) न पुनरात्मगत्या मानुषाणामेष विषयः।

तापसी—यथा भद्रमुखो भणति। अप्सरःसम्बन्धेनास्य बालस्य जनन्यत्र देवगुरोस्तपोवने प्रसूता।

राजा—(आत्मगतम्।) हन्त द्वितीयमिदमाशाजननम्। (प्रकाशम्।) सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी।

तापसी—कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयितुं चिन्तयिष्यति

राजा—(स्वगतम्।) इयं खलु कथा मामेव लक्ष्यीकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि। अथवाऽन्याय्यः परदारव्यवहारः।

(प्रविश्य मृण्मयूरहस्ता।)

तापसी—सर्वदमन शकुन्तलावण्यं पश्य।

बालः—(सदृष्टिक्षेपम्।) कुत्र मे माता।

उभे—नामसादृश्येन वञ्चितो मातृवत्सलः।

द्वितीया—वत्स अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।

राजा—(आत्मगतम्।) किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते।

बालः—(क्रीडनकमादत्ते।) मातः रोचते मे एष भद्रमयूरः।

प्रथमा—(विलोक्य। सोद्वेगम्।) अहो रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।

एवमाश्रमविरुद्धवृत्तिना
संयमः किमिति जन्मतस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दूष्यते
कृष्णसर्पशिशुनेव चन्दनः ॥ ३ ॥

तापसी—भद्रमुख न खल्वयमृषिकुमारः ।

राजा—आकारसदृशं चेष्टितमेवास्य कथयति । स्थानप्रत्ययात्तु वयमेवंतर्किणः । (यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य । आत्मगतम् ।)

अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्या—
द्यस्यायमङ्कात् कृतिनः प्ररूढः ॥ ४ ॥

तापसी—(उभौ निर्वर्ण्य) आश्चर्यमाश्चर्यम् ।

राजा—आर्ये किमिव ।

तापसी—अस्य बालकस्य रूपसंवादिनी ते आकृतिरिति विस्मापितास्मि । अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति ।

राजा—(बालमुपलालयन्) न चेन्मुनिकुमारोऽयमथ कोऽस्य व्यपदेशः ।

तापसी—पुरुवंशः ।

राजा—(आत्मगतम् ।) कथम् । एकान्वयो मम । अतः खलु मदनुकारिणमेनमत्रभवती मन्यते । अस्त्येतत्पौरवाणामन्त्यं कुलव्रतम् ।

भवनेषु सुधासितेषु पूर्वं
क्षितिरक्षार्थमुशन्ति ये निवासम् ।

राजा—अलमावेगेन। नन्विदमस्य सिंहशावविमर्दात्परि-भ्रष्टम्। (आदातुमिच्छति।)

उभे—मा खल्विदमवलम्ब्य। कथं गृहीतमनेन। (विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः।)

राजा—किमर्थं प्रतिषिद्धाः स्मः।

प्रथमा—शृणोतु महाराजः। एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति।

राजा—अथ गृह्णाति।

प्रथमा—ततस्तं सर्पो भूत्वा दशति।

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया।

उभे—अनेकशः।

राजा—(सहर्षमात्मगतम्।) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि। (बालं परिष्वजते।)

द्वितीया—सुव्रते एहि। इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः।

(निष्क्रान्ते।)

बालः—मुञ्च माम्। यावन्मातुः सकाशं गच्छामि।

राजा—पुत्रक मया सहैव मातरमभिनन्दयिष्यसि।

बालः—मम खलु तातो दुष्यन्तः। न त्वम्।

राजा—(सस्मितम्।) एष विवाद एव प्रत्याययति।

अभिज्ञानशाकुन्तलस्य सप्तमाङ्कात्।

राजा—अलमावेगेन। ननु इदमस्य सिंहशावविमर्दात्परिभ्रष्टम्। (आदातुमिच्छति।)

उभे—मा खल्विदमवलम्ब्य। कथं गृहीतमनेन। (विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः।)

राजा—किमर्थं प्रतिषिद्धाः स्मः।

प्रथमा—शृणोतु महाराजः। एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति।

राजा—अथ गृह्णाति।

प्रथमा—ततस्तं सर्पो भूत्वा दशति।

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया।

उभे—अनेकशः।

राजा—(सहर्षमात्मगतम्।) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि। (बालं परिष्वजते।)

द्वितीया—सुव्रते एहि। इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः।

(निष्क्रान्ते।)

बालः—मुञ्च माम्। यावन्मातुः सकाशं गच्छामि।

राजा—पुत्रक मया सहैव मातरमभिनन्दयिष्यसि।

बालः—मम खलु तातो दुष्यन्तः। न त्वम्।

राजा—(सस्मितम्।) एष विवाद एव प्रत्याययति।

अभिज्ञानशाकुन्तलस्य सप्तमाङ्कात्।

तेन संस्पृष्टगात्रस्य भीमसेनस्य वै गदा।
संज्ञा मुमोह सहसा वरदानेन तस्य हि ॥१०॥
निगृह्यैनं महाबाहुं ततः स भुजगस्तदा।
विमुच्यास्य भुजौ पीनाविदं वचनमब्रवीत् ॥११॥
दिष्टस्त्वं क्षुधितस्याद्य देवैर्मह्यं महाभुज।
न हि मे मुच्यते कश्चित्कथंचित्मग्रहं गतः ॥१२॥
गजो वा महिषो वाऽपि षष्ठे काले नरोत्तम।
नासि केवलसर्पेण तिर्यग्योनिषु वर्तता ॥१३॥
गृहीतः कौरवश्रेष्ठ वरदानमिदं मम।
तमुवाच महाबाहुर्भीमसेनो भुजगमम् ॥१४॥
न च क्रुध्ये महासर्प न चात्मानं विगर्हये।
दैवं पुरुषकारेण को वञ्चयितुमर्हति ॥१५॥
दैवमेव परं मन्ये पुरुषार्थो निरर्थकः।
किन्तु नाद्यानुशोचामि तथाऽऽत्मानं विनाशितम् ॥१६
यथा तु विपिने न्यस्तान् भ्रातॄन् राज्यपरिच्युतान्।
विनष्टमथ मां श्रुत्वा भविष्यन्ति निरुद्यमाः ॥१७॥
धर्मशीला मया ते हि बाध्यन्ते राज्यगृद्धिना।
मातरं चैव शोचामि कृपणां पुत्रगृद्धिनीम् ॥१८॥
याऽस्माकं नित्यमाशास्ते महत्त्वमधिकं परैः।
तस्याः कथं त्वनाथाया मद्विनाशाद्भुजंगम ॥१६॥

अफलास्ते भविष्यन्ति मयि सर्वे मनोरथाः ।
एवंविधं बहु तदा विललाप वृकोदरः ॥२०॥
भुजंगभोगसंरुद्धो नाशकच्च विचेष्टितुम् ।
युधिष्ठिरस्तु कौन्तेयो बभूवास्वस्थचेतनः ॥२१॥
द्रौपदीं परिपप्रच्छ क्व भीम इति भारत ।
शशंस तस्मै पाञ्चाली चिरयातं वृकोदरम् ॥२२॥

महाभारतस्य वनपर्वतः ।

१७—ब्राह्मणलक्षणम् ।

युधिष्ठिर उवाच ।

[भुज्यतामयमायुष्मन् भ्राता मेऽमितविक्रमः ।
वयमाहारमन्यं ते दास्यामः क्षुधिवारणम् ॥ १ ॥

सर्प उवाच ।

आद्यमेनं विमोक्ष्यामि न चान्यदपि कामये ।
प्रश्नानुच्चरितानद्य व्याहरिष्यसि चेन्मम ॥ २ ॥
अथ पश्चाद्विमोक्ष्यामि भ्रातरं ते वृकोदरम् ।

युधिष्ठिर उवाच ।

ब्रूहि सर्प यथाकामं प्रतिवक्ष्यामि ते वचः ॥ ३ ॥]

सर्प उवाच ।

ब्राह्मणः को भवेद्राजन् वेद्यं किं च युधिष्ठिर ।
ब्रवीह्यतिमतिं त्वां हि वाक्यैरनुमिमीमहे ॥१॥

युधिष्ठिर उवाच ।

सत्यं दानं क्षमाशीलमानृशंस्यं तपो घृणा ।
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः ॥२॥
वेद्यं सर्प परं ब्रह्म निर्दुःखमसुखं च यत् ।
यत्र गत्वा न शोचन्ति भवतः किं विवक्षितम् ॥३॥

सर्प उवाच ।

चातुर्वर्ण्यं प्रमाणं च सत्यं च ब्रह्म चैव हि ।
शूद्रेष्वपि च सत्यं च दानमक्रोध एव च ॥४॥
आनृशंस्यमहिंसा च घृणा चैव युधिष्ठिर ।
वेद्यं यच्चात्र निर्दुःखमसुखं च नराधिप ॥५॥
ताभ्यां हीनं पदं चान्यन्न तदस्तीति लक्षये ।

युधिष्ठिर उवाच ।

शूद्रे तु यद्भवेल्लक्ष्म द्विजे तच्च न विद्यते ॥६॥
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ।
यत्रैतल्लक्ष्यते सर्प वृत्तं स ब्राह्मणः स्मृतः ॥७॥
यत्रैतन्न भवेत्सर्प तं शूद्रमिति निर्दिशेत् ।
यत्पुनर्भवता प्रोक्तं न वेद्यं विद्यतेति च ॥८॥
ताभ्यां हीनमतोऽन्यत्र पदं नास्तीति चेदपि ।
एवमेतन्मतं सर्प ताभ्यां हीनं न विद्यते ॥९॥
यथा शीतोष्णयोर्मध्ये भवेन्नोष्णं न शीतता ।
एवं वै सुखदुःखाभ्यां हीनं नास्ति पदं क्वचित् ॥१०॥

[illegible] नगरं [illegible] स [illegible]।
[illegible] सम्यग्[illegible] ॥[illegible]
[illegible] मंगलः।
[illegible] पुनरागमनं ॥[illegible]

[illegible]

१८—[illegible]कथा।

[illegible] कुलमर्यादया [illegible] हिनस्ति। न परद्रव्य[illegible] न के[illegible] जीवति। [illegible] चितं दानं देशकालोचितं च ब्राह्मणे[illegible] परायणः समयं निनाय। प्रत्यासन्ने चान्ते पौराणिकं श्रुतम्।

परहिंसापरद्रव्यपरदारपराङ्मुखः।
गंगाप्याह कदाऽऽगत्य मामयं पावयिष्यति ॥१॥

श्रुत्वा च परामृष्टवान्। यदाऽऽजन्मनो मयाऽपि परहिंसा न कृताऽस्ति न परद्रव्यमनीत्या गृहीतं न परदाराभिलाषः कृतः। तदहमपि तद्विशेषणत्रयविशिष्ट एव। यतः

अकृत्यं दूरतस्त्यक्तं सुकृते च मतिः कृता।
सत्यनिष्ठैकभावेन नीतं च सकलं वयः ॥२॥

अयं स कालः संप्राप्तः प्रियो यस्ते प्रियंवद ।
अलंकृत इवाभाति येन संवत्सरः शुभः ॥४॥
नीहारपरुषो लोकः पृथिवी सस्यमालिनी ।
जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥५॥
नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः ।
कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥६॥
प्राज्यकामा जनपदाः सम्पन्नतरगोरसाः ।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥७॥
सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् ।
विहीनतिलकेव स्त्री नोत्तरा दिक् प्रकाशते ॥८॥
प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम् ।
यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः ॥९॥
अत्यन्तसुखसंचारा मध्याह्ने स्पर्शतः सुखाः ।
दिवसाः सुभगादित्याश्छायासलिलदुर्भगाः ॥१०॥
मृदुसूर्याः सनीहाराः पटुशीताः समारुताः ।
शून्यारण्या हिमध्वस्ता दिवसा भान्ति साम्प्रतम् ॥११॥
निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः ।
शीतवृद्धतरायामास्त्रियामा यान्ति साम्प्रतम् ॥१२॥
रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥१३॥

ज्योत्स्ना तुषारमलिना पौर्णमास्यां न राजते ।
सीतेव चातपश्यामा लक्ष्यते न च शोभते ॥१४॥
प्रकृत्या शीतलस्पर्शो हिमविद्धश्च साम्प्रतम् ।
प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥१५॥
बाष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च ।
शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः ॥१६॥
खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ।
शोभन्ते किंचिदालम्बाः शालयः कनकप्रभाः ॥१७॥
मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः ।
दूरमभ्युदितः सूर्यः शशाङ्क इव लक्ष्यते ॥१८॥
अग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतः सुखः ।
संरक्तः किंचिदापाण्डुरातपः शोभते क्षितौ ॥१९॥
अवश्यायनिपातेन किंचित्प्रक्लिन्नशाद्वला ।
वनानां शोभते भूमिर्निविष्टतरुणातपा ॥२०॥
स्पृशन् सुविपुलं शीतमुदकं द्विरदः सुखम् ।
अत्यन्ततृषितो वन्यः प्रतिसंहरते करम् ॥२१॥
एते हि समुपासीना विहगा जलचारिणः ।
नावगाहन्ति सलिलमप्रगल्भा इवाहवम् ॥२२॥
अवश्यायतमोनद्धा नीहारतमसावृताः ।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥२३

बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः ।
हिमार्द्रवालुकास्तीरैः सरितो भान्ति साम्प्रतम् ॥२४॥
तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च ।
शैत्यादगाग्रस्थमपि प्रायेण रसवज्जलम् ॥२५॥
जराजर्जरितैः पत्रैः शीर्णकेसरकर्णिकैः ।
नालशेषा हिमध्वस्ता न भान्ति कमलाकराः ॥२६॥
वाल्मीकीयरामायणस्यारण्यकाण्डतः ।

२०—पार्वतीपरीक्षा ।

अथाजिनाषाढधरः प्रगल्भवाग्
ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥१॥
तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥२॥
विधिप्रयुक्तां परिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमः ॥३॥

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥४॥

यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥५॥

प्रयुक्तसत्कारविशेषमात्मना
न मां परं सम्प्रतिपत्तुमर्हसि ।
यतः सतां संनतगात्रि संगतं
मनीषिभिः साप्तपदीनमुच्यते ॥६॥

अतोऽत्र किंचिद्भवतीं बहुक्षमां
द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥७॥

कुले प्रसूतिः प्रथमस्य वेधस-
स्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वय-
स्तपःफलं स्यात्किमतः परं वद ॥८॥

दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ॥९॥

निवेदितं निश्वसितेन सोष्मणा
मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम् ॥१०॥

कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसंचितं तपः ।
तदर्धभागेन लभस्व कांक्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥११॥

सखी तदीया तमुवाच वर्णिनं
निबोध साधो तव चेत्कुतूहलम् ।
अरूपहार्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥१२॥

न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम् ॥१३॥

इयं च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥१९॥

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥२०॥

उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥२१॥

विपत्प्रतीकारपरेण मंगलं
निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्मवृत्तिभिः ॥२२॥

अकिंचनः सन् प्रभवः स सम्पदां
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥२३॥

विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्तेरवधार्यते वपुः ॥२४॥

तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्म रजोविशुद्धये ।
तथा हि नृत्याभिनयक्रियाच्युतं
विलिप्यते मौलिभिरम्बरौकसाम् ॥२५॥

असम्पदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोरुणाङ्गुली ॥२६॥

विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥२७॥

अलं विवादेन यथाश्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥२८॥

निवार्यतामालि किमप्ययं बटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥२९॥

इतो गमिष्याम्यथवेति वादिनी
चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः ॥३०॥

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥३१॥

कुमारसम्भवस्य पंचमसर्गतः ।

२१—राजकुमारसम्भवः ।

प्रथमोऽध्यायः ।

तेषु चैवमुत्पद्यमानेषु क्रमेणोदपादि हूणहरिणकेसरी, सिन्धुराजज्वरो, गुर्जरप्रजागरो, गान्धाराधिपगन्धद्विपकूट-पाकलो, लाटपाटवपाटच्चरो मालवलक्ष्मीलतापरशुः प्रतापशील इति प्रथितापरनामा, प्रभाकरवर्धनो नाम राजाधिराजः । यो राज्याभिषेकमङ्गलजलैरभिषिच्यमान एव मलानीव मुमोच धनानि ।

ततश्च प्राप्ते ज्यैष्ठे मासि बहुलपक्षद्वादश्यां व्यतीते प्रदोषसमये समारुरुक्षति क्षपायौवने सहसैवान्तःपुरे समुदपादि कोलाहलः स्त्रीजनस्य । निर्गत्य च ससंभ्रमं यशोवत्याः स्वयमेव हृदयनिर्विशेषा धात्र्याः सुता सुयात्रेति नाम्ना राज्ञः पादयोर्निपत्य "देव दिष्ट्या वर्धसे द्वितीयसुतजन्मना" इति व्याहरन्ती पूर्णपात्रं जहार ।

अस्मिन्नेव च काले राज्ञः परमसम्मतो दर्शितप्रभावः सकलगणकमध्ये महितो हितश्च गणकस्तारको नाम समुपसृत्य विज्ञापितवान् । 'देव, श्रूयताम् । मान्धाता किलैवंविधे व्यतीपातादि सर्वदोषरहितेऽहनि सर्वेषूच्चस्थानस्थितेष्वेवं ग्रहेषु ईदृशि लग्ने भेजे जन्म । अर्वाक्ततोऽस्मिन्नन्तराले नाजनि जगति कश्चिदपरः । सप्तानां चक्रवर्तिनामग्रणी चक्रवर्तिचिह्नानां महारत्नानां च भाजनं, सप्तानां सागराणां पालयिता, सप्ततन्तूनां सर्वेषां प्रवर्तयिता, सप्तसप्तिसमः सुतोऽयं देवस्य जातः" इति ।

प्रावर्तत समस्ताभिरपि जनो निर्विशेषबालवृद्धः समानशिष्टाशिष्टजनः प्रवृत्तसकलकटकलोकः पुत्रजन्मोत्सवो महान् । जरत्योऽप्युन्मादिन्य इव रमण्यो रेजुः । विद्वांसोऽपि मत्ता इवात्मानं विसस्मरुः । सर्वस्वं च ददौ नरपतिः । दिशि दिशि कुबेरकोशा इवालुप्यन्त लोकेन द्रविणराशयः ।

अनतिक्रामति काले धात्रीकराङ्गुलिलग्ने पंचषाणि पदानि प्रयच्छति हर्षे, षष्ठं वर्षमवतरति च राज्यवर्धने, देवी यशोवती गर्भेणाधत्त देवीं राज्यश्रियम् । पूर्णेषु प्रसवदिवसेषु हंसमधुरस्वरां शरदमिव प्रासूत, प्रभावर्षिणीं रत्नजातिमिव वेला, सकलजननयनानन्दकारिणीं चन्द्रलेखामिव प्रतिपत्, प्रसून-

यती दुर्दिनरम् । यया द्विपोः सुतयोरुपरि स्नानयोरिवैकाव-लीलया निरराजत ।

महाकविबाणस्य हर्षचरितात् ।

२३—दूतहनुमान् ।

ययौ विज्ञाय हनुमान् सुग्रीवस्य महात्मनः ।
पर्वतादृष्यमूकात्तु पुप्लुवे यत्र राघवौ ॥ १ ॥
कपिरूपं परित्यज्य हनुमान्मारुतात्मजः ।
भिक्षुरूपं ततो भेजे शठबुद्धितया कपिः ॥ २ ॥
ततश्च हनुमान्वाचा श्लक्ष्णया सुमनोज्ञया ।
विनीतवदुपागम्य राघवौ प्रणिपत्य च ॥ ३ ॥
आबभाषे च तौ वीरौ यथावत्प्रशशंस च ।
सम्पूज्य विधिवद्वीरौ हनुमान्वानरोत्तमः ॥ ४ ॥
उवाच कामतो वाक्यं मृदु सत्यपराक्रमौ ।
राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ ॥ ५ ॥
देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ ।
त्रासयन्तौ मृगगणानन्यांश्च वनचारिणः ॥ ६ ॥
पम्पातीररुहान्वृक्षान्वीक्षमाणौ समन्ततः ।
इमां नदीं शुभजलां शोभयन्तौ तरस्विनौ ॥ ७ ॥
धैर्यवन्तौ सुवर्णाभौ कौ युवां चीरवाससौ ।
निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः ॥ ८ ॥

सिंहविप्रेक्षितौ वीरौ महाबलपराक्रमौ ।
शक्रचापनिभे चापे गृहीत्वा शत्रुनाशनौ ॥ ९ ॥

श्रीमन्तौ रूपसम्पन्नौ वृषभश्रेष्ठविक्रमौ ।
हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ ॥१०॥

प्रभया पर्वतेन्द्रोऽयं युवयोरवभासितः ।
राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ ॥११॥

पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ ।
अन्योन्यसदृशौ वीरौ देवलोकादिहागतौ ॥१२॥

यदृच्छयेव सम्प्राप्तौ चन्द्रसूर्यौ वसुन्धराम् ।
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ ॥१३॥

आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः ।
सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः ॥१४॥

इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने ।
प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते ॥१५॥

सम्पूर्णाश्च शितैर्बाणैस्तूणाश्च शुभदर्शनाः ।
जीवितान्तकरैर्घोरैर्ज्वलद्भिरिव पन्नगैः ॥१६॥

महाप्रमाणौ विपुलौ तप्तहाटकभूषणौ ।
खड्गावेतौ विराजेते निर्मुक्तभुजगाविव ॥१७॥

एवं मां परिभाषन्तं कस्माद्वै नाभिभाषतः ।
सुग्रीवो नाम धर्मात्मा कश्चिद्वानरपुंगवः ॥१८॥

अविस्तरमसन्दिग्धमविलम्बितमव्यथम् ।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम् ॥२९॥
संस्कारक्रमसम्पन्नामद्रुतामविलम्बिताम् ।
उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम् ॥३०॥
अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ।
कस्य नाराध्यते चित्तमुद्यतासेररेरपि ॥३१॥
एवंविधो यस्य दूतो न भवेत्पार्थिवस्य तु ।
सिद्ध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ ॥३२॥
एवंगुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः ।
तस्य सिध्यन्ति सर्वेऽर्था दूतवाक्यप्रचोदिताः ॥३३॥
एवमुक्तस्तु सौमित्रिः सुग्रीवसचिवं कपिम् ।
अभ्यभाषत वाक्यज्ञो वाक्यज्ञं पवनात्मजम् ॥३४॥
विदिता नौ गुणा विद्वन्सुग्रीवस्य महात्मनः ।
तमेव चावां मार्गावः सुग्रीवं प्लवगेश्वरम् ॥३५॥
यथा ब्रवीषि हनुमन्सुग्रीववचनादिह ।
तत्तथा हि करिष्यावो वचनात्तव सत्तम ॥३६॥

तत्तस्य वाक्यं निपुणं निशम्य
प्रहृष्टरूपः पवनात्मजः कपिः ।
मनः सामाधाय, जयोपपत्तौ
सख्यं तदा कर्तुमियेष ताभ्याम् ॥३७॥

वाल्मीकीयरामायणस्य किष्किन्धाकाण्डतः ।

अविस्तरमसन्दिग्धमविलम्बितमव्यथम् ।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम् ॥२९॥
संस्कारक्रमसम्पन्नामद्रुतामविलम्बिताम् ।
उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम् ॥३०॥
अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ।
कस्य नाराध्यते चित्तमुद्यतासेररेरपि ॥३१॥
एवंविधो यस्य दूतो न भवेत्पार्थिवस्य तु ।
सिद्ध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ ॥३२॥
एवंगुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः ।
तस्य सिध्यन्ति सर्वेऽर्था दूतवाक्यप्रचोदिताः ॥३३॥
एवमुक्तस्तु सौमित्रिः सुग्रीवसचिवं कपिम् ।
अभ्यभाषत वाक्यज्ञो वाक्यज्ञंपवनात्मजम् ॥३४॥
विदिता नौ गुणा विद्वन्सुग्रीवस्य महात्मनः ।
तमेव चावां मार्गावः सुग्रीवं प्लवगेश्वरम् ॥३५॥
यथा ब्रवीषि हनुमन्सुग्रीववचनादिह ।
तत्तथा हि करिष्यावो वचनात्तव सत्तम ॥३६॥

तत्तस्य वाक्यं निपुणं निशम्य
प्रहृष्टरूपः पवनात्मजः कपिः ।
मनः समाधाय जयोपपत्तौ
सख्यं तदा कर्तुमियेष ताभ्याम् ॥३७॥

वाल्मीकीयरामायणस्य किष्किन्धाकाण्डतः ।

२४-मेघः ।

गर्जन्ति शैलशिखरेषु विलम्बिबिम्बा
मेघा वियुक्तवनिताहृदयानुकाराः ।
येषां रवेण सहसोत्पतितैर्मयूरैः
खं वीज्यते मणिमयैरिव तालवृन्तैः ॥१॥

पवनचपलवेगः स्थूलधाराशरौघः
स्तनितपटहनादः स्पष्टविद्युत्पताकः ।
हरति करसमूहं खे शशाङ्कस्य मेघो
नृप इव पुरमध्ये मन्दवीर्यस्य शत्रोः ॥२॥

उद्भ्रमति भ्रमति वर्षति
गर्जति मेघः करोति तिमिरौघम् ।
प्रथमश्रीरिव पुरुषः
करोति रूपाण्यनेकानि ॥३॥

तालीषु तारं विटपेषु मन्द्रं
शिलासु रूक्षं सलिलेषु चण्डम् ।
संगीतवीणा इव ताड्यमाना-
स्तालानुसारेण पतन्ति धाराः ॥४॥

२५—व्याधवृत्तम् ।

(शुकः कथयति ।) आसीच्च मे मनसि । अहो मोहप्रायमेतेषां जीवितं साधुजनविगर्हितं च चरितम् । तथा हि । पुरुषपिशितोपहारे धर्मबुद्धिः । आहारः साधुजननिन्दितो मधुमांसादिः । श्रमो मृगया । शास्त्रं शिवारुतम् । समुपदेष्टारः सदसतां कौशिकाः । प्रज्ञा शकुनिज्ञानम् । परिचिताः श्वानः । राज्यं शून्यास्वटवीषु । आपानकमुत्सवः । मित्राणि क्रूरकर्मसाधनानि धनूंषि । सहाया विषदिग्धमुखा भुजंगा इव सायकाः । गीतमुत्सादकारि मुग्धमृगाणाम् । कलत्राणि बन्दीगृहीताः परयोषितः । क्रूरात्मभिः शार्दूलैःसह संवासः । पशुरुधिरेण देवतार्चनम् । मांसेन बलिकर्म । चौर्येण जीवनम् । भूषणानि भुजंगमणयः । वनगजमदैरङ्गरागः । यस्मिन्नेव कानने निवसन्ति तदेवोत्खातमूलमशेषतः कुर्वते ।

कादम्बरीतः ।

२६—चन्द्रापीडस्य विद्यामन्दिरप्रवेशस्तथा च सकलविद्याभ्यासः ।

तारापीडः क्रीडाभ्यासंगविघातार्थं बहिर्नगरादनुशिप्रमर्धक्रोशमात्रायाममतिमहता तुहिनगिरिशिखरमालानुकारिणा सुधाधवलेन प्राकारमण्डलेन परिवृतं, अनुप्राकारमाहितेन महता [illegible]केन परिवेष्टितं, अतिदृढकपाटसंपुटं, उद्घाटितैकद्वार- [illegible] अधःकल्पित- [illegible] अमरगणाकारं विद्यामन्दिरमकारयत् । सर्व- [illegible] च संग्रहे यत्नमतिमहान्तमन्वतिष्ठत् । तत्रस्थं

२५—व्याधवृत्तम् ।

(शुकः कथयति ।) आसीच्च मे मनसि । अहो मोहप्रायमेतेषां जीवितं साधुजनविगर्हितं च चरितम् । तथा हि । पुरुषपिशितोपहारे धर्मबुद्धिः । आहारः साधुजननिन्दितो मधुमांसादिः । श्रमो मृगया । शास्त्रं शिवारुतम् । समुपदेष्टारः सदसतां कौशिकाः । प्रज्ञा शकुनिज्ञानम् । परिचिताः श्वानः । राज्यं शून्यास्वटवीषु । आपानकमुत्सवः । मित्राणि क्रूरकर्मसाधनानि धनूंषि । सहाया विषदिग्धमुखा भुजंगा इव सायकाः । गीतमुत्पादकारि मुग्धमृगाणाम् । कलत्राणि बन्दीगृहीताः परयोषितः । क्रूरात्मभिः शार्दूलैःसह संवासः । पशुरुधिरेण देवतार्चनम् । मांसेन बलिकर्म । चौर्येण जीवनम् । भूषणानि भुजंगमणयः । वनगजमदैरङ्गरागः । यस्मिन्नेव कानने निवसन्ति तदेवोत्खातमूलमशेषतः कुर्वते ।

कादम्बरीतः ।

२६—चन्द्रापीडस्य विद्यामन्दिरप्रवेशस्तथा च सकलविद्याभ्यासः ।

तारापीडः क्रीडाव्यासंगविघातार्थं बहिर्नगरादनुशिप्रमर्धक्रोशमात्रायाममतिमहता तुहिनगिरिशिखरमालानुकारिणा सुधाधवलेन प्राकारमण्डलेन परिवृतं, अनुप्राकारमाहितेन महता परिखावलयेन परिवेष्टितं, अतिदृढकपाटसंपुटं, उद्घाटितैकद्वारप्रवेशं, एकान्तोपरचितवाजिवाहनशालाविभागं, अधःकल्पितव्यायामशालं, अमरभवनाकारं विद्यामन्दिरमकारयत् । सर्वविद्याचार्याणां च संग्रहे यत्नमतिमहान्तमन्वतिष्ठत् । तत्रस्थं

तं केसरिकिशोरकमिव पञ्जरगतं कृत्वा प्रतिषिद्धनिर्गमं, आ-
र्यकुलपुत्रप्रायपरिजनपरिवारं, अपनीताशेषशिशुजनक्रीडा-
सङ्गं, अनन्यमनसं, अखिलविद्योपादानार्थमाचार्येभ्यश्च-
न्द्रापीडं शोभने दिवसे वैशम्पायनद्वितीयमर्पयाम्बभूव। प्रति-
दिवसमुत्थायोत्थाय सह विलासवत्या विरलपरिजनस्तत्रैव
गत्वालोकयामास राजा।

चन्द्रापीडोऽप्यनन्यहृदयतया तथा नियन्त्रितो राज्ञाऽचिरे-
णैव कालेन यथास्वमात्मकौशलं प्रकटयद्भिः पात्रवशादुपजा-
तोत्साहैराचार्यैरुपदिश्यमानाः सर्वा विद्या जग्राह। मणिदर्पण
इवातिनिर्मले तस्मिन्संचक्राम सकलकलाकलापः। तथा हि
पदे वाक्ये प्रमाणे धर्मशास्त्रे राजनीतिषु व्यायामविद्यासु
चापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषु सर्वेष्वायु-
धविशेषेषु रथचर्यासु गजपृष्ठेषु तुरंगमेषु वीणावेणुमुरजकां-
स्यतालदर्दुरपुटप्रभृतिषु वाद्येषु भरतादिप्रणीतेषु नृत्तशास्त्रेषु
नारदीयप्रभृतिषु गान्धर्ववेदविशेषेषु हस्तिशिक्षायां तुरग-
वयोज्ञाने पुरुषलक्षणेषु चित्रकर्मणि पत्रच्छेद्ये पुस्तकव्यापारे
लेख्यकर्मणि सर्वासु द्यूतकलासु शकुनिरुतज्ञाने ग्रहगणिते
रत्नपरीक्षासु दारुकर्मणि दन्तव्यापारे वास्तुविद्यास्वायुर्वेदे
यन्त्रप्रयोगे विषापहरणे तरणे लंघने प्लुतिष्वारोहणे रतितन्त्रे-
इन्द्रजाले कथासु नाटकेष्वाख्यायिकासु काव्येषु महाभारत-
पुराणेतिहासरामायणेषु सर्वलिपिषु सर्वदेशभाषासु
सर्वसंज्ञासु सर्वशिल्पेषु छन्दःस्वन्येष्वपि कलाविशेषेषु पर
कौशलमवाप।

सहजा चास्याजस्रमभ्यस्यतो वृकोदरस्येव [illegible] पपा-
विर्भूय सर्वलोकविस्मयजननी महाप्राणता। यस्य[illegible]
लीलयैव [illegible] सह-

२५—व्याधवृत्तम् ।

(शुकः कथयति ।) आसीच्च मे मनसि । अहो मोहप्रायमेतेषां जीवितं साधुजनविगर्हितं च चरितम् । तथा हि । पुरुषपिशितोपहारे धर्मबुद्धिः । आहारः साधुजननिन्दितो मधुमांसादिः । श्रमो मृगया । शास्त्रं शिवारुतम् । सदसदुपदेष्टारः कौशिकाः । प्रज्ञा शकुनिज्ञानम् । परिचिताः श्वानः । राज्यं शून्यास्वटवीषु । आपानकमुत्सवः । मित्राणि क्रूरकर्मसाधनानि धनूंषि । सहाया विषदिग्धमुखा भुजगा इव सायकाः । गीतमुन्मादकारि मुग्धमृगाणाम् । कलत्राणि बन्दीगृहीताः परयोषितः । क्रूरात्मभिः शार्दूलैः सह संवासः । पशुरुधिरेण देवतार्चनम् । मांसेन बलिकर्म । चौर्येण जीवनम् । भूषणानि भुजङ्गमणयः । वनगजमदैरङ्गरागः । यस्मिन्नेव कानने निवसन्ति तदेवोत्खातमूलमशेषतः कुर्वन्ति ।

कादम्बरी ।

२६—चन्द्रापीडस्य विद्यामन्दिरप्रवेशस्तथा च सकलविद्याभ्यासः ।

[illegible]

lure. मुखरः A leader. निशम्य Hearing. कापुरुषः कुत्सितः पुरुषः A bad man. प्रती० Remedy.

Page 4. सदसि In the assembly. व्यसनं Attachment. एकचित्तीभूय With one mind. च्वि Formation. संहतिः A collection or union. कार्य० Accomplishes the object. गुण० Turned into the state of a rope. चक्षु० Gone behind the range of seeing ; could not be seen. लुब्धकः A hunter. कार्य० On account of the cause and effect, with some object in view. आलोच्य Having decided or thought विवरः A hole. अपायः Harm. चकितः Startled. प्रत्यभि० Having recognised. ससंभ्रमं Hurridly.

Page 5. प्राक्तन Previous or former. परीतापः Torment, affliction व्यसनं A calamity. देहिनाम् Of the human beings मा मैवम् No, not so तावत् वाक्यालंकारे Just. छिनद्मि pre third pres sing. of छिद् 7th conj. I cut. यथाशक्ति शक्तिमनतिक्रम्य यथा स्यात्तथा अव्ययीभावः According to my strength. खण्डय Cut दाराः The word is always used in the plural number and belongs to the masculine gender A wife भणद् Said. सोढुं or सहितुं Inf. of सह् to bear. प्राज्ञः A wise man. त्यजेत् Should abandon विनाशे० भावे सप्तमी When the death is certain मलदायिना Dirty, adjective to कायेन ।

Page 6. दूरं० Very great is the difference. क्षण-विध्वंसि Momentary. कल्पान्तस्थायिनः Permanent. गुण-

dential talks स्थानभ्रष्टा: Fallen from their position or place. मनस्विनः To a spirited person. विषयः Territory or country. प्रहरणं A weapon. गाहते Enters. द्विपेन्द्ररुधिरं The blood of the lord of elephants. सुनिरूपितं Well observed. आख्या Name (by name कर्पूरगौर).
कूर्मः A tortoise.

Page 9. अभणत् Said. वृत्तिः Means of maintenance. अभ्यागतः A guest. जगाद Perfect of गद् to speak said धुरीणः A leader foremost. कारुण्यरत्नाकरः An ocean of kindness. मूषिकराजः The word राजन् at the end of a तत्पु० compound is changed to राज. परिव्राजका० The residence of a recluse नागदन्तकः A peg. उत्प्लुत्य Having jumped. प्रत्यहम् Every day अव्ययी० अहनि अहनि. जर्जर० By a piece of an old bamboo. विरक्तः Indifferent, unattached अन्यासक्तः Attached or attending to something else

Page 10. केना-तव्यम् Impersonal construction. There must be some reason. खनित्रम् A spade. अक्षमः Unable. सत्रासम् Fearfully. अवरम् Inferior वञ्चनम् Deception. प्राणैः By life Always used in plural. अनलः Fire. उपचारपरिभ्रष्टः Devoid of civility, uncourteous.

Page 11. ह्रियम् Shame, accusative singular. परिभवः Insult. निर्वेदः Despondency निर्विण्णः Despondent, depressed. शुचं एति Goes to pain, is grieved. आसदम् Place, resort. विमृश्य Thinking. पिण्डेन With

Page 15. मापगमा: Attended with dissociation. भंगुरम् Brittle, Transitory रसायनम् Elixir, balm. निकषग्रावा Touchstone. अभ्यर्णं इत्वा Going near. चञ्च्वा: With beak. कच्छप: Tortoise. तूर्णं, द्राक्, शीघ्रं Soon. कर्तरिका-कर्तरी-कर्तनी Scissors, a small dagger. अन्तिकम् Near.

Page 16. असमीक्ष्यकारिणः Rashly doing an action. ध्रुवाणि What is certain, a thing actually in hand.

३—उपदेशः।

सिद्धा-यान् Extremely potent in the means of getting the aims of life unobtained and preserving those obtained. प्रश्नो० By means of this necklace of jewels in the form of questions and answers उपादेयम् Fit to be accepted हेयम् Fit to be abandoned. अनवद्यम् Flawless, blameless विरतिः Non-attachment, disaffection.

Page 17. योषित् Woman अर्द्यते Is pained. अविशादः One who is doubtful. तितिक्षा Desiderative noun from तिज् forgiveness. शस्तम् Praiseworthy प्रशस्तम् कमला Wealth

Page 18. प्राणात् Generally used in the plural.

४—अयोध्यावर्णनम्।

स्फीतः P p p. of स्फाय, prosperous. आयता Long आवासयामास Inhabited. कपाट० Possessed of gates and arches. सुवि० णाम् Market places well laid out. शिल्पी

out noble conduct. निशामित Heard. अभिजनः Line-age. पर्यायः A mode, way. देहबंधः Bodily frame. निनादः Notes or sound.

Page 22. चिबुकम् Chin संवदति, अनुहरति, अनुकरोति Resembles. अभिव्यज्यते Can be clearly seen. प्रति-बिम्बता Image, reflection. पुण्यानुभावः Holy majestic bearing. पारिप्लवम् Fickle, perplexed. अभ्यर्णं P. p. p. of अर्द्, near. मेध्यः Sacrificial.

Page 23. दौहित्रः The daughter's son प्रणीत Composed. प्रकाशितः Published सन्दर्भान्तरेण Into a separate episode. अभिनेयार्थः Fit to be shown on the stage. प्रयोजयिष्यति Will represent on the stage. आकूतकरम् Exciting curiosity. आस्था Care. अन्तेवासि-नाम् Of students. आनुयात्रिकः Follower, escort. अप्रमा-दार्थं To guard against mischance

Page 24. यमजौ Twins पर्यन्तः End अलीक० Dis-tressed on account of the false popular scandals. निर्वासिता Banished. देव० Born of the sacrificial ground. दैव० The adverse turn of the cruel fate. परिभवः Insult. व्यथा Agony, pain क्रव्यादगणः A group of rawflesh-eaters शरणम् A protector, help. असकृत् More than once. पशुसमाम्नायः A book on zoo-logy or a work giving the names of beasts. सांग्रामिकम् A book on warfare

Page 25. शष्पम् Grass. शकृत्पिण्डकः Balls of dung. अजिनम् Skin dress. सकौतुक० With curiosity, mo-

desty and restraints प्राचेतसः A scion of वरुण- वाल्मीकि. कवचिनः Armoured warriors दण्डिनः Club-holders निषङ्गिणः Quiver-bearers तत्प्रायं Almost like that. प्रत्ययः Belief, faith ऊर्जस्वल Great mighty.

Page 25. सन्दीपनानि Exciting बिभीषिका Threatening. लोष्टैः By lumps of earth रोहितः Deer वराक Poor animal सोत्प्रास० Hard hearted and cruel आयु० Lines of armed men दृप्त Proud, arrogant. अरिविमर्दनः The destroyer of foes आक्षिप्तहृदय० His mind being attracted by a curiosity to behold the charming eastern forests तरुगहनम् A thicket of trees कृतम् Indeclinable, enough तर्जयन्ति Threaten विस्फुरन्ति Are flashing.

६—सुहृद्वचनम् ।

Page 27. क्षुद्र० Common to low people प्राकृतः An ordinary person. विषज्योभयन्तं Overcome with passion or getting unnerved नरुणत्सि You do not check इन्द्रियोपप्लवः Perturbation of the senses निरुत्सुकता Adversion to अभिनिवेशः Ardent longing अरुचिः Disliking संस्कारः Education, training. प्रबुद्धता Wisdom, enlightenment रागा० Are soiled by the influence of passion. प्रमादः Carelessness, inattention. विगत० Absent mindedness. अनार्या Wicked or knavish girl.

७—शस्त्रविद्याप्रदर्शनम्

कृतास्त्राः *Proficient in the use of arms or missiles.*

Page 28. कुरुसत्तम Best of Kurus, धृतराष्ट्र. भारद्वाज Descendant of भरद्वाज, द्रोण. क्षत्तर् O son of a female slave, विदुर. मापयामास Measured. रंगभूमौ In the arena. प्रेक्षागारम् An auditorium, a theatre रक्षा A guard or a chamber. मञ्चाः Couches, sofas. विपुला० Commodious lofty and costly platforms or palanquins.

